This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M749 विषय धर्मशास्त्र

नाव. उदकशांति (MSS)

लेखक/लिपीकार सीताराम पिंपरखेडे

पृष्ठ 96 काळ — पूर्ण/अपूर्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ॐ ६५

१८ नंबर [redacted]

॥ उदकशांतिप्रारंभः॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीमन्नारायणाय नमः ॥ श्रीकुलज्ञादेव्यै नमः ॥ श्रीवेदपुरुषाय नमः ॥ अथोदकशां
तिं व्याख्यास्यामो गोमयेन गोचर्ममात्रं चतुरस्रमुपलिप्य कर्ताशुचिः प्रक्षालि
तपाणिपादो वाचांतोदर्भेषूपविष्टो दूर्वादर्भांश्च धारयमाणः प्राणानायम्य दे
शकालौ संकीर्त्य अमुककर्मांगभूतमुदकशांतिं करिष्ये ॥ इति संकल्प्य । पंचप्रस्थ
सिकताभिः शुद्धाभिरद्भिरङ्गुलमात्रं चतुरस्रं स्थंडिलं कृत्वा स्रुवमूलेन व्रीहि
दर्भान् अंगुष्ठेन मामानामिकाभ्यां चोपसंगृह्य ॥ ब्रह्मजज्ञानं प्रथमं पुरस्तादिति सीमतः
सुरुचो वेन आवः ॥ स बुध्निया उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः ॥
तस्य पश्चादारभ्य मध्ये प्राचीं रेखां ततो रेखां लिखित्वा ॥ नाकेसुपर्णमुपयत्पतंतं
हृदा वेनंतो अभ्यचक्षत त्वा ॥ हिरण्यपक्षं वरुणस्य दूतं यमस्य योनौ शकुनं

भुरण्युं ॥ तस्य दक्षिणतः प्रादेशमात्रे तथैवं विलिख्य ॥ तस्योत्तरत आप्यायस्व
समेतु ते विश्वतः सोम वृष्णियं भवा वाजस्य संगथे ॥ इत्यथैवं विलिख्य ॥ तस्य
दक्षिणतो मध्यादारभ्य ॥ यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो रुद्रो विश्वा भुव
नाविवेश तस्मै रुद्राय नमो अस्तु ॥ इत्युदीचीं संततां रेखां लिखित्वा ॥ अपउ
पस्पृश्य ॥ ततः पश्चात्प्रादेशमात्रे ॥ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं ॥ समूढ
मस्य पांसुरे ॥ इत्यथैवं वि[illegible]लिख्य ॥ तस्य पुरस्तात् ॥ इंद्रं विश्वा अवीवृधन्समुद्र
व्यचसं गिरः ॥ रथीतमं रथीनां वाजानां सत्पतिं पतिं ॥ तथैवं वि[illegible]लिख्य ॥
अभ्रिरभ्युक्ष्य दूर्वादर्भैरवकीर्य गंधोदकेनाभ्युक्ष्य तदुत्तरतो दर्भेषु प्रोक्षणीः
संस्पृश्य ॥ पवित्रे कृत्वा तृणं काष्ठं वांतर्धाय अद्भिर्निः प्रोक्षणीः प्रोक्ष्य नरके

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्रह्मपात्रं प्रोक्ष्य पूपरस्ताब्रह्मजतानमितिमंत्रेणास्थंडिलेनिधाय॥देवस्यत्वास
वितुःप्रसवेश्विनोर्बाहुभ्यां पूष्णोहस्ताभ्यां परिस्तरणमसीतिषोडशभिर्द
र्भैरुदगग्रैःपुरस्तात्परिस्तीर्य॥भुर्भुवःस्वःइतिदक्षिणतःप्रागग्रैःसप्तदशा
भिः॥उद्वयंतमसस्परिपश्यंतोज्योतिरुत्तरं॥देवंदेवत्रासूर्यमगन्मज्योति
रुत्तमं॥पश्चादुदगग्रैरष्टादशभिः॥अग्नआयाहिवीतयेगृणानोहव्यदा
तये॥निहोतासत्सिबर्हिषि॥इत्युत्तरतःप्रागग्रैःसप्तदशभिःपरिस्तीर्य॥
तत्सवितुर्वरेण्यमितिजलपस्तिरःपवित्रंब्रह्मपात्रेपउआनीय॥शंनोदेवि
रभिष्टयआपोभवंतुपीतये॥शंयोरभिस्रवंतुनः॥आपोवाइदंसर्वंवि
श्वाभूतान्यापःप्राणावाआपःपशवआपोन्नमापोमृतमापःसम्राज

प२ य२

पोविराडापःस्वराडापश्छंदांस्यापोज्योतींष्यापोयजूंष्यापःसत्यमापःसर्वादेवताआपो
भूर्भुवःसुवरापओं३॥अपःप्रणयति॥श्रद्धावाआपः॥श्रद्धामेवारभ्यप्रणीयप्रचरति॥
अपःप्रणयति॥यज्ञोवाआपः॥यज्ञमेवारभ्यप्रणीयप्रचरति॥अपःप्रणयति॥
वज्रोवाआपः॥वज्रमेवभ्रातृव्येभ्यःप्रहृत्यप्रणीयप्रचरति॥अपःप्रणयति॥
आपोवैरक्षोघ्नीःरक्षसामपहत्यै॥अपःप्रणयति॥आपोवैसर्वादेवताः
देवताएवारभ्यप्रणीयप्रचरति॥भूर्भुवस्सुवरो३॥मितिपवाक्षींनहुल्लानो
प॥पूर्वैर्दर्भैःफलैःखदीरैर्युर्वोदर्भैःप्रच्छाद्यसप्रक्षालितपाणिपात्र
याचांतांश्चतुरोब्राह्मणानुदकशातिकेसिंजंत्वामहंवृणइतिवृत्वा॥प्रति
दिशमासनेषूपविश्यसोऽशोपचारैःसंपूज्य॥शंनोदेवीरभिष्टयइत्य
भिमंत्रणति॥ब्रह्मपात्रमन्वारभ्यतसवितुवरेण्यमित्येतांपश्चार्ध्वंगो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नवानमिस्फुरन्नावेदादीत्राक्षोप्नादीं१श्चयज्ञपेयुः॥ॐ॥भूस्तत्सवितुर्वरेण्यं॥भुवो शां॰
भर्गोदेवस्यधीमहि॥स्वधियोयोनःप्रचोदयात्॥ॐ॥भूर्भुवस्तत्सवितुर्वरेण्य रै
भर्गोदेवस्यधीमहि॥स्वधियोयोनःप्रचोदयात्॥ॐ भूर्भुवस्वस्तत्सवितुर्व
रेण्यंभर्गोदेवस्यधीमहिधीयोयोनप्रचोदयात्॥ॐ॥अग्निमीळेपुरोहितंयज्ञ
स्यदेवमृत्विजं॥होतारंरत्नधातमं॥इतिऋग्वेदादि॥ॐ॥इषेत्वोर्जेत्वावायवस्थो व
पायवस्थदेवोवःसवितार्पयतुश्रेष्ठतमायकर्मणे॥इतियजुर्वेदादि॥ॐ॥
अग्नआयाहिवीतयेगृणानोहव्यदातये॥निहोतासत्सिबर्हिषि॥इतिसाम
वेदादि॥ॐशंनोदेवीरभिष्टयआपोभवंतुपीतये॥शंयोरभिस्रवंतुनः॥
इत्यथर्ववेदादि॥ॐम॥कृणुष्वपाजःप्रसितिंनपृथ्वींयाहिराजेवामवां१इ
भेन॥तृष्वीमनुप्रसिंद्रूणानोस्तासिविध्यरक्षसस्तपिष्ठैः॥तवभ्रमासआशु
तिं
॥ ३

दे२ लि२

यापतंत्यनुस्पृशधृषताशोशुचानः॥तपूंष्यग्नेजुह्वापतंगानसंदितोविसृज
विष्वगुल्काः॥प्रतिस्पशोविसृजतूर्णितमोभवापायुर्विशोअस्याअदब्धः
योनोदूरेअघशंसोयोअंत्यग्नेमाकिष्टेव्यथिरादधर्षीत्॥उदग्नेतिष्ठप्रत्यातनुष्व दे
न्यमित्रां१ओषतात्तिग्महेते॥योनोअरातिंसमिधानचक्रेनीचातंधक्ष्यत
संनशुष्कं॥ऊर्ध्वोभवप्रतिविध्याध्यस्मदाविष्कृणुष्वदैव्यान्यग्ने॥अवस्थि
रातनुहियातुजूनांजामिमजामिंप्रमृणीहिशत्रून्॥सतेजानातिसुमतिं
यविष्ठयईवतेब्रह्मणेगातुमैरत्॥सेदग्नेअस्तुसुभगःसुदानुर्यस्त्वानित्ये
नहविषायउक्थैः॥पिप्रीषतिस्वआयुषिदुरोणेविश्वेदस्मैसुदिनासासदिष्टिः॥
अर्चामितेसुमतिंघोष्यर्वाक्संतेवावाताजरतामियंगीः॥स्वश्वास्त्वासु
\+ विश्वान्यस्मैसुदि॥नारायोद्युम्नान्यर्यविदुरोअभिद्यौत्+३
नि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३ बा२ ६०

॥५॥ रथा मर्जयेमा स्मे श्चवारिगंधारयेरनुधून्॥ रुतत्वाभूर्याचरेदुपस्मन्दोषावस्त
र्दीदिवां सम नुधून्॥ क्रीडंत स्त्वा सुमनसः सपेमाभिद्युम्ना तस्थिवांसो जनानां॥
पस्त्वा स्वश्वः सुहिरण्यो अग्न उपयाति वसुमता रथेन॥ तस्य त्राता भवसि तस्य
सखा यस्त आतिथ्यमानुषग्जुजोषत्॥ महो रुजामि बंधुता वचोभिस्तन्मा पि
तुर्गोतमादन्वियाय॥ त्वं नो अस्य वचसश्चिकिद्धि होतर्यविष्ठ सुक्रतो दमू
प्र नाः॥ अस्वप्नजस्तरणयः सुशेवा अतंद्रासोऽवृका अश्रमिष्ठाः॥ ते पायवः सध्र्य
ञ्चो निषद्याग्ने तव नः पांत्वमूर॥ ये पायवो मामतेयं ते अग्ने पश्यंतो अंधं दुरि
तादरक्षन्॥ ररक्ष तान्सुकृतो विश्ववेदा दिप्संत इद्रिपवो नाह देभुः॥ त्वया
वयं सधन्यस्त्वोता स्तव प्रणीत्यश्याम वाजान्॥ उभा शंसा सूदय सत्यताते
नुष्ठुया कृणुह्यह्रयाण॥ अया ते अग्ने समिधा विधेम प्रति स्तोमं शस्य
॥४॥

प्र२ मानं गृभाय॥ दहाशसो रक्षसः पाह्यस्मान्द्रुहो निदो मित्रमहो अवद्यात्॥
क्षोरुणं वाजिनमाजिघर्मि मित्रं प्रथिष्ठमुपयामि शर्म॥ शिशानो अग्निः क्रतुभिः
समिद्धः स नो दिवा स रिषः पातु नक्तं॥ वि ज्योतिषा बृहता भात्यग्निराविर्विश्वा
नि कृणुते महित्वा॥ प्रादेवीर्मायाः सहते दुरेवाः शिशीते शृंगे रक्षसे विनिक्षे॥
उत स्वानासो दिवि षंत्वग्नेस्तिग्मायुधा रक्षसे हंतवा उ॥ मदे चिदस्य प्ररु
जंति भामा न वरंते परिबाधो अदेवीः॥ इस र्धर्चः प्रतिसंबंधे॥१॥ इंद्रं वो वि
श्वतस्परि हवामहे जनेभ्यः॥ अस्माकमस्तु केवलः॥ इंद्रं नरो नेमधिता ह
वंते यत्पार्या युनजते धियस्ताः॥ शूरो नृषाता शवसश्चकान आ गोमति व्रजे
भजा त्वं नः॥ इंद्रियाणि शतक्रतो या ते जनेषु पंचसु॥ इंद्र तानि त आ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रंसे॥ अनु ते दायि मह इंद्रियाय सत्रा ते विश्वमनु वृत्रहत्ये॥ अनु क्षत्रमनु सहो यजत्रें
द्र देवेभिरनु ते नृषह्ये॥ आपश्चित्पिप्युः स्तर्यो न गावो नक्षन्नृतं जरितारस्त इंद्र॥ याहि वायुर्न नियुतो नो अच्छा त्वं हि धीभिर्दयसे वि वाजान्॥ ऋषि
हरी धृष्णुस्त्वमरं स्य घर्मो अतिथिः॥ आ मा सकूपकमेर आ सूर्यं रोहयो दिवि॥
घर्मं न सामं तपता सुवृक्तिभिर्जुष्टं गिर्वणसे गिरः॥ इंद्रमिद्गाथिनो बृहदिं
द्रमर्केभिरर्किणः॥ इंद्रं वाणीरनूषत॥ गायंति त्वा गायत्रिणोर्चंत्यर्कम
र्किणः॥ ब्रह्माणस्त्वा शतक्रतवुद्वंशमिव येमिरे॥ अंहोमुचे प्रभरेमा म
नीषामोषिष्ठदाव्ने सुमतिं गृणानाः॥ इदमिंद्र प्रतिहव्यं गृभाय सत्याः संतु
यजमानस्य कामाः॥ विवेष यन्मा धिषणा जजान स्तवै पुरा पार्यादिंद्रमह्नः॥
अंहसो यत्र पीपरद्यथा नो नावेव यांतमुभये हवंते॥ प्र सम्राजं प्रथममध्वरा

णामंहोमुचं वृषभं यज्ञियानां॥ अपां नपातमश्विना हयंतमस्मिन्नर इंद्रियं
धत्तमोजः॥ वि न इंद्र मृधो जहि नीचा यच्छ पृतन्यतः॥ अधस्पदं तमीं कृधि यो
अस्माँ अभिदासति॥ इंद्र क्षत्रमभि वाममोजोजायथा वृषभ चर्षणीनां॥ अ
पानुदो जनममित्रयंतमुरुं देवेभ्यो अकृणोरु लोकं॥ मृगो न भीमः कुचरो गि
रिष्ठाः परावत आ जगामा परस्याः॥ सृकं संशाय पविमिंद्र तिग्मं वि शत्रून्ता
ढि वि मृधो नुदस्व॥ वि शत्रून्वि मृधो नुद वि वृत्रस्य हनू रुज॥ वि मन्युमिंद्र भा
मितो मित्रस्याभिदासतः॥ त्रातारमिंद्रमवितारमिंद्रं हवेहवे सुहवं शूर
मिंद्रं॥ हुवे नु शक्रं पुरुहूतमिंद्रं स्वस्ति नो मघवा धात्विंद्रः॥ मा ते अस्यां सहसा
वन्परिष्टावघाय भूम हरिवः परादै॥ त्रायस्व नोवृकेभिर्वरूथैस्तव प्रियासः सू
रिषु स्याम॥ अनवस्ते रथमश्वाय तक्षंस्त्वष्टा वज्रं पुरुहूत द्युमंतं॥ ब्रह्माण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इंद्रं मरुत्वंतो अर्कैरवर्धयन्नहये हंतवा उ॥ रक्षेयुत्तेरषणो अर्कमर्चीनिंद्र ग्रावाणो
अदितिः सजोषाः॥ अनश्वासो ये पवयो रथा इंद्रेषिता अभ्यवर्तंत दस्यून्॥२॥
यत इंद्र भयामहे ततो नो अभयं कृधि॥ मघवंछग्धि तव तन्न ऊतये विद्विषो विमृधो
जहि॥ स्वस्तिदा विशस्पतिर्वृत्रहा विमृधो वशी॥ वृषेंद्रः पुर एतु नः स्वस्तिदा अ
भयंकरः॥ मृगा एंद्रो वज्रबाहुः षोडशी शर्म यच्छतु॥ स्वस्ति नो मघवा करोतु हंतु
पाप्मानं यो स्मान्द्वेष्टि॥ सजोषा इंद्र सगणो मरुद्भिः सोमं पिब वृत्रहञ्छूर विद्वान्॥
जहि शत्रूँरप मृधो नुदस्वाथाभयं कृणुहि विश्वतो नः॥ ये देवाः पुरःसदो ग्निने
त्रा रक्षोहणस्ते नः पांतु ते नोवंतु तेभ्यो नमस्तेभ्यः स्वाहा॥ ये देवा दक्षिणासदो
यमनेत्रा रक्षोहणः ०॥ ये देवाः पश्चात्सदः सवितृनेत्रा रक्षोहणः ०॥ ये दे
उत्तरसदो वरुणनेत्रा रक्षोहणः ०॥ ये देवा उपरिषदो बृहस्पतिनेत्रा रक्षो

हणः ०॥ अग्नये रक्षोघ्ने स्वाहा॥ यमाय रक्षोघ्ने स्वाहा॥ सवित्रे रक्षोघ्ने स्वाहा॥ व
रुणाय रक्षोघ्ने स्वाहा॥ बृहस्पतये दुवस्वते रक्षोघ्ने स्वाहा॥ अग्निरायुष्मान्स वन
स्पतिभिरायुष्मांस्तेन त्वायुषायुष्मंतं करोमि॥ सोम आयुष्मान्स ओषधीभिरायुष्मान् ०॥
यज्ञ आयुष्मान्स दक्षिणाभिरायुष्मान् ०॥ ब्रह्मायुष्मत्तद्ब्राह्मणैरायुष्मत् ०॥ दे
वा आयुष्मंतस्तेमृतेनायुष्मंतस्ते ०॥ यावामिंद्रावरुणा यतव्या तनूस्तयेमम
हसो मुंचतं॥ यावामिंद्रावरुणा सहस्या तनूः ०॥ यावामिंद्रावरुणा रक्षस्या तनूः ०॥
यावामिंद्रावरुणा तेजस्या तनूः ०॥ यो वामिंद्रावरुणावग्नौ स्रामस्तं वामेतेना
वयजे॥ यो वामिंद्रावरुणा द्विपात्सु पशुषु स्रामः ०॥ यो वामिंद्रावरुणा चतुष्पात्सु पशुषु
स्रामः ०॥ यो वामिंद्रावरुणा गोष्ठे स्रामः ०॥ यो वामिंद्रावरुणा गृहेषु स्रामः ०॥ यो वा
मिंद्रावरुणाप्सु स्रामः ०॥ यो वामिंद्रावरुणौषधीषु स्रामः ०॥ यो वामिंद्राव
वरुणा ३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

७ स्वाहा वनस्पतिभ्यः स्वाहा ॥०॥ अग्ने यशस्विन्यशसेममर्पयेंद्रावतीमपचितीमिहा
वह ॥ अयं मूर्धा परमेष्ठी सुवर्चाः समानानामुत्तमश्लोको अस्तु ॥ भद्रं पश्यंत उप से
दुरग्रे तपो दीक्षामृषयः स्वर्विदः ॥ ततः क्षत्रं बलमोजश्च जातं तदस्मै देवा अभि
संनमंतु ॥ धाता विधाता परमोत संदृक् प्रजापतिः परमेष्ठी विराजा ॥ स्तो
माश्छंदांसि निविदो म आहुरेतस्मै राष्ट्रमभि संनमाम ॥ अभ्यावर्तध्वमु
पमेत साकमयं शास्ताधिपतिर्वो अस्तु ॥ अस्य विज्ञानमनुसंरभध्वमि
मं पश्चादनुजीवाथ सर्वे ॥३॥ ऋताषाडृतधामाग्निर्गंधर्वस्तस्यौषधयोऽप्सरस
ऊर्जो नाम स इदं ब्रह्म क्षत्रं पातु ता इदं ब्रह्म क्षत्रं पांतु तस्मै स्वाहा ताभ्यः स्वाहा ॥
संहितो विश्वसामा सूर्यो गंधर्वस्तस्य मरीचयोऽप्सरस आयुवः सुषु
म्नः सूर्यरश्मिश्चंद्रमा गंधर्वस्तस्य नक्षत्राण्यप्सरसो बेकुरयो भुज्युः सु

६

स:

र पर्णो यज्ञो गंधर्वस्तस्य दक्षिणा अप्सरसः स्तवाः प्रजापतिर्विश्वकर्मा मनो
गंधर्वस्तस्य ऋक्सामान्यप्सरसो वह्नय इषिरो विश्वव्यचा वातो गंधर्वस्तस्यापो
अप्सरसो मुदा भुवनस्य पते यस्य त उपरि गृहा इह च ॥ स नो रास्वाज्यानिं रा
यस्पोषं सुवीर्यं संवत्सरीणां स्वस्तिं ॥ परमेष्ठ्यधिपतिर्मृत्युर्गंधर्वस्तस्य वि
श्वमप्सरसो भुवः सुक्षितिः सुभूतिर्भद्रकृत्सुवर्वान्पर्जन्यो गंधर्वस्तस्य विद्युतोऽप्स स्त
रसो रुचो दूरेहेतिरमृडयो मृत्युर्गंधर्वस्तस्य प्रजा अप्सरसो भीरुवश्चारुः कृप
णकाशी कारी कामो गंधर्वस्तस्याधयोऽप्सरसः शोचयंतीर्नाम स इदं ब्रह्म क्षत्रं पा
तु ता इदं ब्रह्म क्षत्रं पांतु तस्मै स्वाहा ताभ्यः स्वाहा ॥ स नो भुवनस्य पते यस्य
त उपरि गृहा इह च ॥ उरु ब्रह्मणे अस्मै क्षत्राय महि शर्म यच्छ ॥४॥ नमो अस्तु स
र्पेभ्यो ये के च पृथिवीमनु ॥ ये अंतरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः ॥ ये दो रोच

ह२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३० मु १२ ३॥

नेदिवो येवासूर्यस्य रश्मिषु॥ येषामप्सु सदः कृतं तेभ्यः सर्पेभ्यो नमः॥ या इषवो या
तुधानानां येवावनस्पतीँ१रनु॥ येवावटेषु शेरते तेभ्यः सर्पेभ्यो नमः॥५॥ अयं पु
रो हरिकेशः सूर्यरश्मिस्तस्य रथगृत्सश्च रथौजाश्च सेनानिग्रामण्यौ पुंजिक
स्थला च कृतस्थला चाप्सरसौ यातुधाना हेतीरक्षांसि प्रहेतिस्ते
भ्यो नमस्ते नोऽवंतु ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जंभे दध्मामि॥ अयं दक्षिणा
विश्वकर्मा तस्य रथस्वनश्च रथेचित्रश्च सेनानिग्रामण्यौ मेनका च सहजन्या चाप्स
रसौ दंक्ष्णवः पशवो हेतिः पौरुषेयो वधः प्रहेतिः०॥ अयं पश्चाद्विश्वव्यचास्तस्य रथ
प्रोतश्चासमरथश्च सेनानिग्रामण्यौ प्रम्लोचंती चानुम्लोचंती चाप्सरसौ
सर्पा हेतिर्व्याघ्राः प्रहेतिः०॥ अयमुत्तरात्संयद्वसुस्तस्य सेनजिच्च सुषेणश्च
सेनानिग्रामण्यौ विश्वाची च घृताची चाप्सरसावापो हेतिर्वातः प्रहेतिः०॥

८

अयमुपर्यर्वाग्वसुस्तस्य तार्क्ष्यश्चारिष्टनेमिश्च सेनानिग्रामण्यावुर्वशी च पूर्व
चित्तिश्चाप्सरसौ विद्युद्धेतिरवस्फूर्जन्प्रहेतिः०६॥ आशुः शिशानो वृषभो न युध्मो
घनाघनः क्षोभणश्चर्षणीनां॥ संक्रंदनो निमिष एकवीरः शतं१ सेना अजयत्सा
कमिंद्रः॥ संक्रंदनेनानिमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना॥ तदिं
द्रेण जयत तत्सहध्वं युधो नर इषुहस्तेन वृष्णा॥ स इषुहस्तैः स निषंगिभिर्वशी स भि
१स्रष्टा स युध इंद्रो गणेन॥ संसृष्टजित्सोमपा बाहुशर्ध्यूर्ध्वधन्वा प्रतिहिता
भिरस्ता॥ बृहस्पते परि दीया रथेन रक्षोहामित्रा१ अपबाधमानः॥ प्रभंज
न्सेनाः प्रमृणो युधा जयन्नस्माकमेध्यविता रथानां॥ गोत्रभिदं गोविदं व
ज्रबाहुं जयंतमज्म प्रमृणंतमोजसा॥ इमं१ सजाता अनुवीरयध्वमिं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

० ८०

२॥ द्रꣳसखायोअनुसꣳरभध्वं॥बलविज्ञायस्थविरःप्रवीरःसहस्वान्वाजीसहमान
उग्रः॥अभिवीरोअभिसत्वासहोजाजैत्रमिंद्ररथमातिष्ठगोवित्॥अभि
गोत्राणिसहसागाहमानोदायोवीरःशतमन्युरिंद्रः॥दुश्च्यवनःपृतनाषाढयु
अ- ध्योस्माकꣳसेनावतुप्रयुत्सु॥इंद्रआसांनेताबृहस्पतिर्दक्षिणायज्ञःपुर
एतुसोमः॥देवसेनानामभिभंजतीनांजयंतीनांमरुतोयंत्वग्रं॥इंद्रस्यवृष्णो
वरुणस्यराज्ञआदित्यानांमरुतांꣳशर्धउग्रं॥महामनसांभुवनच्यवानांघो
मि- षोदेवानांजयतामुदस्थात्॥अस्माकमिंद्रःसमृतेषुध्वजेष्वस्माकंयाइषवस्ता
जयंतु॥अस्माकंवीराउत्तरेभवंत्वस्मानुदेवाअवताहवेषु॥उद्धर्षयम
घवन्नायुधान्युत्सत्वनांमामकानांमहाꣳसि॥उद्वृत्रहन्वाजिनांवाजिनान्युद्र

थानांजयतामेतुघोषः॥उपप्रेतजयतानरःस्थिरावःसंतुबाहवः॥इंद्रोवःशर्म
यच्छत्वनाधृष्यायथासथ॥अवसृष्टापरापतशरव्येब्रह्मसꣳशिता॥ प्र
गच्छामित्रान्प्रविशमैषांकंचनोच्छिषः॥मर्माणितेवर्मणाच्छादयामिसोमस्त्वारा म
जामृतेनाभिवस्तां॥उरोर्वरीयोवरिवस्तेअस्तुजयंतंत्वामनुमदंतुदेवाः॥
यत्रबाणाःसंपतंतिकुमाराविशिखाइव॥इंद्रोनस्तत्रवृत्रहाविश्वाहाशर्मय
च्छतु॥७॥शंचमेमयश्चमेप्रियंचमेनुकामश्चमेकामश्चमेसौमनसश्चमे
भद्रंचमेश्रेयश्चमेवस्यश्चमेयशश्चमेभगश्चमेद्रविणंचमेयंताचमेधर्ता
चमेक्षेमश्चमेधृतिश्चमेविश्वंचमेमहश्चमेसंविच्चमेज्ञात्रंचमेसूश्चमेप्रसूः
श्चमेसीरंचमेलयश्चमऋतंचमेमृतंचमेयक्ष्मंचमेनामयच्चमेजीवातुश्च
मेदीर्घायुत्वंचमेनमित्रंचमेभयंचमेसुगंचमेशयनंचमेसूषाचमेसुदि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३०

॥१०॥ नं च मे ॥८॥ मम ाग्ने वर्चो विहवेष्वस्तु वयं त्वेंधानास्तन्वं पुषेमा ॥ मह्यं नमतां
प्रदिशश्चतस्त्रस्त्वयाध्यक्षेण पृतना जयेम ॥ मम देवा विहवे संतु सर्व इंद्रावं
तो मरुतो विष्णुरग्निः ॥ ममांतरिक्षमुरुगोपमस्तु मह्यं वातः पवतां कामे
ध्य अस्मिन् ॥ मयि देवा द्रविणमायजंतां मय्याशीरस्तु मयि देवहूतिः ॥ दैव्या होता
रा वनिषंत पूर्वेरिष्टाः स्याम तन्वा सुवीराः ॥ महां यजंतु मम यानि हव्याकूतिः
सत्या मनसो मे अस्तु ॥ एनो मा नि गां कतमच्चनाहं विश्वे देवासो अधिवो
चता मे ॥ देवीः षडुर्वीरुरु नः कृणोत विश्वे देवास इह वीरयध्वं ॥ मा हास्म ह
हि प्रजया मा तनूभिर्मा रधाम द्विषते सोम राजन् ॥ अग्निर्मन्युं प्रतिनुदन्पु
रस्ताददब्धो गोपाः परि पाहि नस्त्वं ॥ प्रत्यंचो यंतु निगुतः पुनस्ते मैषां चित्तं

॥१०॥

प्रबुधां वि नेशत् ॥ धाता विधाता भुवनस्य यस्पतिर्देवः सवितारमभि
मातिषाहं ॥ इमं यज्ञमश्विनोभा बृहस्पतिर्देवाः पांतु यजमानं न्यर्थात् ॥
उरुव्यचा नो महिषः शर्म यंसदस्मिन्हवे पुरुहूतः पुरुक्षु ॥ स नः प्रजायै हर्य
श्व मृडयेंद्र मा नो रीरिषो मा परा दाः ॥ ये नः सपत्ना अप ते भवंत्विंद्राग्निभ्या
मव बाधामहे तान् ॥ वसवो रुद्रा आदित्या उपरिस्पृशं मोग्रं चेत्तारमधि
म राजमक्रन् ॥ अर्वांचमिंद्रममुतो हवामहे यो गोजिद्धनजिदश्वजिद्यः ॥ इमं नो त्रि
यज्ञं विहवे जुषस्वास्य कुर्मो हरिवो मेदिनं त्वा ॥९॥ अग्ने मन्ये प्रथमस्य प्रचे
तसो यं पांचजन्यं बहवः समिंधते ॥ विश्वस्यां विशि प्रविविशिवांसमी
महे स नो मुंचत्वंहसः ॥ यस्येदं प्राणन्निमिषद्यदेजति यस्य जातं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१ जनमानं च केवलं ॥ स्तौम्यग्निं नाथितो जोहवीमि स नो ०॥ इंद्रस्य मन्ये प्रथमस्य प्रचे
त सो वृत्रघ्नस्तोमा उप मामुपागुः यो दाशुषः सुकृतो हवमुप गंता स नो ०॥ यः सं
ज ग्रामं नयति सं वशी युधे यः पुष्टानि संसृजति त्रयाणि ॥ स्तौमींद्रं नाथितो जोहवीमि
स नो ०॥ मन्वे वां मित्रावरुणा तस्य वित्तं सत्यौजसा दृंहणा यं नुदेथे ॥ या राजा
नं सरथं याथ उग्रा ता नो मुंचतमागसः ॥ यो वां रथ ऋजुरश्मिः सत्यधर्मा मिथुः श्च
म श्चरंतमभियाति दूषयन् ॥ स्तौमि मित्रावरुणा नाथितो जोहवीमि तौ नो ०॥ वायोः
सवितुर्विदथानि मन्महे यावात्मन्वद्विशथो यौ च रक्षथः ॥ यौ विश्वस्य परिभूव श्व
भूवतुस्तौ नो ०॥ उप श्रेष्ठा न आशिषो देवयोर्धर्मे अस्थिरन् ॥ स्तौमि वायुं सं
वितारं नाथितो जोहवीमि तौ नो ०॥ रथीतमौ रथीनामह्व ऊतये शुभं गमिष्ठौ सु
यमेभिरश्वैः ॥ ययोर्वां देवौ देवेष्वनिशितं महो जनः स्तौ नो ०॥ यदयातं वहतुं सू

मा ३
प्रि
याया स्त्रिचक्रेण संसदमिच्छमानौ ॥ स्तौ॰ देवावश्विनौ नाथितो जोह
वीमि तौ नो ०॥ मरुतां मन्वे अधि नो ब्रुवंतु प्रेमां वाचं विश्वामवंतु विश्वे ॥
आशून्हुवे सुयमानूतये ते नो मुंचंत्वेनसः ॥ तिग्ममायुधं वीडितं सहस्वद्दि
भि- व्यं शर्धः पृतनासु जिष्णु ॥ स्तौ॰ देवान्मरुतो नाथितो जोहवीमि ते नो ०॥
देवानां मन्वे ०॥ आशून्हुवे ०॥ यदिदं माभिशोचति पौरुषेयेण दैव्येन ॥
स्तौमि विश्वान्देवान्नाथितो ०॥ अनु नोद्यानुमतिर्यज्ञं देवेषु मन्य
तां ॥ अग्निश्च हव्यवाहनो भवतां दाशुषे मयः ॥ अन्विदनुमते त्वं मन्या
सै शं च नस्कृधि ॥ क्रत्वे दक्षाय नो हिनु प्रण आयूंषि तारिषः ॥ वै
श्वानरो न उत्या प्रयातु परावतः ॥ अग्निरुक्थेन वाहसा पृष्टो दिवि पृ
ष्टो विश्वा ओषधीरा विवेश ॥ वैश्वानरः सहसा पृष्टो अग्निः स नो दिवा
+ अग्निः पृथिव्यां पृष्टो + १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१२॥ सप्तर्षिः पातु नर्क्तं ॥ ये अग्रथे नाममित्रे भिरूतजौ भिर्ये प्रतिष्ठे अभवतां व
सूना ॥ सौमित्रा वा पृथिवी नाथिते ज्ञो हविमिते नो मुंचतं हसः ॥३
वैश्वा दूसी व वरिवः कृणोतं क्षे वस्य पत्नी आधि नो ब्रूयातं ॥ स्त्रौ मिद्या
बोर पृथिवी ०॥ यत्रैव यं पुष्प त्रा यविष्ठा चिद्धा ँ स श्च रूमा कच्च
नागः ॥ कृधी स्वस्मा ँ उ अदितेर नागा व्येनां ँ सि शिश्रथो विष्वगग्ने ॥
यथा ह तद्वसवो गौर्यं चित्पदि षितामभुंचता यजत्राः ॥ एवा त्व
मस्मत्प्र मुंचा व्यं ँ हः प्रतार्यग्ने प्रतरन्न आयुः ॥ समीची नामासि प्रा
ची दिक्तस्यास्ते ग्निरधिपतिरसितो रक्षिता यश्चाधिपतिर्यश्च
गोप्ता ताभ्यां नमस्तौ नो मृडयतां ते यं द्विष्मो यश्च नो द्वेष्टि तं वां जंभे
दधामि ॥ म०

ओजस्विनी नामासि दक्षिणा दिक्तस्यास्त इंद्रोधिपतिः पृदाकू रक्षिता ०॥
प्राचीनामासि प्रतीची दिक्तस्यास्ते सोमोधिपतिः स्वजो रक्षिता य
श्चाधिपति ० अवस्थावा नामास्युदीची दिक्तस्यास्ते वरुणोधिपतिस्ति
रश्चि राजी रक्षिता यश्चाधि ०॥ अधिपत्नी नामासि बृहती दिक्तस्यास्ते
बृहस्पतिरधिपतिः श्वित्रो रक्षिता ०॥ वशिनी नामासि यं दिक्तस्या
स्ते यमोधिपतिः कल्माषग्रीवो रक्षिता ०॥ हेतयो नमस्थ तेषां वः पुरो
गृहा अग्निर्व इषवः सलिलो वात नामं ते भ्यो वो नमस्ते नो मृडयं
ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जंभे दधामि ॥ निलिंपा नाम स्थ तेषां वः
दक्षिणा गृहाः पितरो व इषवः सगरो वात नामं ते भ्यो वो नमः ०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१३॥ वृजिरो नामस्थ तेषांवः पश्चाद्गृहाः स्वश्रौवरषं वोग हरो वात नामं०॥ अ
वस्थावानो नामस्थ तेषांवउ त्तराद्गृहा आपोवइषवः समुद्रो वात नामं०॥
अधिपतयो नामस्थ तेषांवउ परिगृहा वर्षं वइषवो वस्वाचात नामं०॥
क्रव्या नामस्थ पार्थिवास्तेषांव इहगृहा अन्नं वइषवों वात नामं०॥ श
तायुधा यज्ञात वीर्यापज्ञा तो तयेष्वि मातिषाहै॥ शालं योनेः शार हो अ
जीलानि निंश्रेनषुहति दुरितानि विश्वा॥ ये चत्वारः पथयो देवयाना अं
तरा द्यावा पृथिवी वियंति॥ तेषां यो अज्याति मजीतिमावहात्तस्मै नो
देवाः परिदत्तेह सर्वे॥ ग्रीष्मोहेमंत उत नो वसंतः शरद्वषीः सुवित
नो अस्तु॥ तेषामृतूनां शतशारदानां निवात एषामभये स्याम॥
इदुवत्सराय परिवत्सराय संवत्सराय कृणुता बृहन्नमः॥ तेषां वु

यं सुमतौ यज्ञियानां ज्योगजीता अहतास्याम॥ भद्रान्नः श्रेय समनैष्ट देवास्त्व
यावसेन समशीमहि त्वा॥ स नो मयोभूः पितो आविश स्वशं तोकाय तनुवे स्यो
नः॥ भूतं भव्यं भविष्यद्वषट्स्वाहा नमः ऋक्साम यजुर्वषट्स्वाहा नमो गाय
त्री त्रिष्टुप् जगती वषट्स्वाहा नमः पृथिव्यंतरिक्षं द्यौर्वषट्स्वाहा नमोऽग्नि
मे. र्वायुः सूर्यो वषट्स्वाहा नमः प्राणो व्यानोपानो वषट्स्वाहा नमो अन्नं कृषिर्वृष्टि
र्वषट्स्वाहा नमः पिता पुत्रः पौत्रो वषट्स्वाहा नमो भूर्भुवः स्वर्वषट्स्वा
हा नमः॥१०॥ अथ ब्राह्मणक्रमः॥ इंद्रो दधीचो अस्थभिः॥ वृत्राण्यप्र
तिष्कुतः॥ जघान नवतीर्नव॥ इच्छन्नश्वस्य यच्छिरः॥ पर्वतेष्वपश्रितं॥
तद्विदच्छर्यणावति॥ अत्राह गोरमन्वत॥ नाम त्वष्टुरपीच्यं॥ इत्था चंद्र
मसो गृहे॥ इंद्रमिद्गाथिनो बृहत्॥ इंद्रमर्केभिरर्किणः॥ इंद्रं वाणीरनूष

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उ॰ ६२ ६॰

॥१४॥ षता ॥ इंद्रइद्धर्योः सचा ॥ संमिश्ल आवचोयुजा ॥ इंद्रो वज्री हिरण्ययः ॥ इंद्रो
दीर्घाय चक्षसे ॥ आसूर्यं रोहयद्दिवि ॥ वि ॥ विगोभिरद्रिमैरयत् ॥ इंद्र
वाजेषु नोअव ॥ सहस्रप्रधनेषु च ॥ उग्र उग्राभिरूतिभिः ॥ तमिंद्रं वाज
यामसि ॥ महे वृत्राय हंतवे ॥ सवृषा वृषभो भुवत् ॥ इंद्रः सहामनेद्
नः ॥ ओजिष्ठः सबलं हितः ॥ द्युम्नी श्लोकी ससोम्यः ॥ गिरा वज्रो न
संभृतः ॥ सबलो अनपच्युतः ॥ ववक्षरुग्रो अस्तृतः ॥ चक्षु
षो हेते मनसो हेते ॥ वाचो हेते ब्रह्मणो हेते ॥ योमाघायुरभि
दासति ॥ तमग्ने मेन्यामेनिं कृणु ॥ योमा चक्षुषा यो मनसा ॥
योवाचा ब्रह्मणाघायुरभिदासति ॥ [illegible] तयाग्ने त्वंमे

१४
१५

न्या ॥ अमुमेनिं कृणु ॥ यत्किंचासौ मनसा यच्च वाचा ॥ यज्ञैर्जु
होति यजुषा हविर्भिः ॥ तन्मृत्युर्निर्ऋत्या संविदानः ॥ पुरा दिष्टा दाहु
तीरस्य हंतु ॥ यातुधाना निर्ऋतिरादु रक्षः ॥ ते अस्य घ्नंत्वनृतेन स
त्यं ॥ इंद्रेषिता ॥ आज्यमस्य मथ्नंतु ॥ मा तत्समृद्धि यदसौ करोति ॥ हन्मि ते
ऽहं कृतं हविः ॥ यो मे घोरमचीकृतः ॥ अपांचौ त उभौ बाहू ॥ अपनह्याम्या
स्यं ॥ अपनह्यामि ते बाहू ॥ अपनह्याम्यास्यं ॥ अग्ने देवस्य ब्रह्मणा ॥ स
स्वा र्वं ते वधिषं कृतं ॥ पुरामुष्य वषट्कारात् ॥ यज्ञं देवेषु नस्कृधि ॥ स्विष्टमु
स्माकं भूयात् ॥ मास्मा न्प्राप्नु ज्वरातपः ॥ अंति दूरे सतो अग्ने ॥ भ्रातृ
व्यस्याभिदासतः ॥ वषट्कारेण वज्रेण ॥ कृत्या हन्मि कृतामहं ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उ० ह०

॥१८॥ यो मानुनकं स्वी साये ॥ श्रुतश्च्या न्हौ निपीयति ॥ अध्वात मिंद्र वज्रैल ॥ भ्रा
तृव्यं पाद्यामसि ॥ प्रा रोरक्ष तिविश्व मेजन ॥ इयौ भूत्वा बहुधा बहूनि ॥
सहस्र वैश्वानरो ॥ यो देवो देवै विभूरं तः ॥ ओ रदूरां क्षेत्रियं यध्य गंद्दषा
तमिसात्तां मनसोपशिक्षत ॥ अग्ने देवानामिरमेतु नो हवि ॥ मनसः
श्चिते दं ॥ भूतं भव्यं च रूप्यते ॥ तद्धि देवेषु चप्रियं ॥ अनेनतु पुरश्चरं ॥
सुहृद्दैवै रिमं पूह वि ॥ विराड्देवी पुरोहिता ॥ हव्यवाडनपायिनी ॥
ययारूपाणि बहुधा भवंति ॥ पेशाणसि देवाः परमे जनित्रे ॥ सानो वि
राडनपस्फुरंती ॥ वाक्देवी जुषतामिदं हविः ॥ चक्षु देवानां ज्योति
रमृतेन्यक्तं ॥ अस्य विज्ञानायबहुधानि

+ मनः श्रेयसि श्रेयसि ॥ कर्मन्यध्यक्षपतिं हयते ॥ जुषतामिदं हविः ॥ +२

॥१५

ति२

चीयते ॥ तस्य सुम्नमशीमहि ॥ मानो हासिद्विचक्षणं ॥ आयुरिन्नः प्रती
र्यतां ॥ अनंधाश्चक्षुषावयं ॥ जीवाज्योतिरशीमहि ॥ सुवर्ज्योतिरुताम तं ॥
श्रोत्रेण भद्रमुत शृण्वंति सत्यं ॥ श्रोत्रेण वाचं बहुधोद्यमानां ॥ श्रोत्रे
ता० णमोदश्च महश्च श्रूयते ॥ श्रोत्रे सर्वा दिशा आशृणोमि ॥ येन प्राच्या
उत दक्षिणा ॥ प्रतीच्यै दिशः शृण्वंत्युत्तरात् ॥ तदिच्छ्रोत्रं बहुधोद्य
वैं० मानं ॥ अरान्ननेमिः परि सर्वं बभूव ॥१॥ सिंहे व्याघ्र उत या पृदाको ॥
त्विषिरग्नौ ब्राह्मणे सूर्ये या ॥ इंद्रं या देवी सुभगा जजान ॥ सानआ
गं च चैसा संविदाना ॥ या राजन्ये दुंदुभावायतायां ॥ अश्वस्य क्रंदे
पुरुषस्य मायौ ॥ इंद्रं या० ॥ सानआगन् ० ॥ या हस्तिनि द्वीपिनि या हि
रण्ये ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३० ६०

॥१६॥ त्विषिरश्वेषु पुरुषेषु गोषु ॥ इंद्रिया० ॥ सा न आगन्॥ रथेष्वक्षेषु वृ
षभस्य वाजे ॥ वाते पर्जन्ये वरुणस्य शुष्मे ॥ इंद्रिया० ॥ सा न आगन् ॥
राडसि विराडसि ॥ सम्राडसि स्वराडसि ॥ इंद्राय त्वा तेजस्वते तेज
स्वंतं श्रीणामि ॥ इंद्राय त्वौजस्वत ओजस्वंतं श्रीणामि ॥ इंद्रा
पयस्व तेपय य त्वा तेजस्वंतं श्रीणामि ॥ इंद्राय त्वायुष्मत आयुष्मंतं श्रीणा
मि ॥ तेजोसि ॥ तत्ते प्रयच्छामि ॥ तेजस्वदस्तु मे मुखं ॥ तेजस्व
च्छिरो अस्तु मे ॥ तेजस्वान्विश्वतः प्रत्यङ् ॥ तेजसा संपिपृग्धि
मा ॥ ओजोसि ॥ तत्ते० ॥ ओजस्वदस्तु मे० ॥ ओजस्वच्छिरः ॥

॥१९०

ओजस्वान्० ॥ ओजसा० ॥ पयोसि ॥ तत्ते० ॥ पयस्वत् ॥ पयस्वच्छिरः ॥
पयस्वान्विश्वतः० ॥ पयसा संपि० ॥ आयुरसि ॥ तत्ते० ॥ आयुष्मत्० ॥ आ
युष्मच्छिरः० ॥ आयुष्मान्विश्वतः० ॥ आयुषा संपि० ॥ इमं मग्न आयु
षे वर्चसे कृधि ॥ प्रियं रेतो वरुण सोम राजन् ॥ मातेवास्मा अदिते शर्म
यच्छ ॥ विश्वे देवा जरदष्टिर्यथासत् ॥ आयुरसि विश्वायुरसि ॥
सर्वायुरसि सर्वमायुरसि ॥ यतो वातो मनोजवाः ॥ यतः क्षरंति
सिंधवः ॥ तासां त्वा सर्वासां रुचा ॥ अभिषिंचामि वर्चसा ॥ समु
द्र इवासि गंभना ॥ सोम इवास्यदाभ्यः ॥ अग्निरिव विश्वतः प्रत्य
ङ् ॥ सूर्य इव ज्योतिषा विभूः ॥ अपां यो द्रवणे रसः ॥ तमहमस्मा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१७॥ अमुष्यायुष्मणाय ॥ तेजसे ब्रह्मवर्चसाय गृह्णामि ॥ अपां यस्तु मैरसः
तमहं ॥ ओजसे वीर्याय गृह्णामि ॥ अपां यो मध्यतो रसः ॥
तमहं ॥ पुष्ट्यै प्रजननाय गृह्णामि ॥ अपां यो यज्ञियो रसः ॥ त
महं ॥ आयुषे दीर्घायुत्वाय गृह्णामि ॥ अहमस्मि प्रथमजा ऋ
तस्य ॥ पूर्वं देवेभ्यो अमृतस्य नाभिः ॥ यो मा ददाति स इदेवमा
वाः ॥ अहमन्नमन्नमदन्तमद्मि ॥ पूर्वमग्नेरपि दहत्यन्नं ॥ यत्तौ
हासाते अहमुत्तरेषु ॥ व्यात्तमस्य पशवः सुजंभं पश्यन्ति धीराः ति
प्रचरन्ति पाकाः ॥ जहाम्यन्यं न जहाम्यन्यं ॥ अहमन्नं वशमि
च्चरामि ॥

समानमर्थं पर्येमि भुंजत् ॥ को मामन्नं मनुष्यो दयेत ॥ पराके अन्नं
निहितं लोक एतत् ॥ विश्वैर्देवैः पितृभिर्गुप्तमन्नं ॥ यद्द्यते लुप्यते य
त्परोप्यते ॥ शततमी सा तनूर्मे बभूव ॥ महान्तौ चरू सकृद्दुग्धेन प
प्रौ ॥ दिवं च पृश्निं पृथिवीं च साकं ॥ तत्संपिबन्तो न मिनन्ति वेधसः ॥
नैतद्भूयो भवति नो कनीयः ॥ अन्नं प्राणमन्नमपानमाहुः ॥ अन्नं
मृत्युं तमु जीवातुमाहुः ॥ अन्नं ब्रह्माणो जरसं वदन्ति ॥ अन्नमाहुः प्र
जननं प्रजानां ॥ मोघमन्नं विन्दते अप्रचेताः ॥ सत्यं ब्रवीमि वध इत्स त
स्य ॥ नार्यमणं पुष्यति नो सखायं ॥ केवलाघो भवति केवलादी ॥ अ
हं मेघः स्तनयन्वर्षन्नस्मि ॥ मामदन्त्यहमद्म्यन्यान् ॥ अहं स

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उ० ला२ त० १०

॥१८॥ हृम्लोभवामि॥मद्रोदित्याअधिसर्वैलपंति॥देवींवाचमजनयंतदेवाः॥
तांविश्वरूपाःपशवोवदंति॥सानोमंद्रेषमूर्जंदुहाना॥धेनुर्वागस्मानु
पसुष्टुतैतु॥यद्वाग्वदंत्यविचेतनानि॥राष्ट्रीदेवानांनिषसादमंद्रा॥
चतस्रऊर्जंदुदुहेपयांसि॥क्वस्विदस्याःपरमंजगाम॥अनंतामं
तादधिनिर्मितांमहीं॥यस्यांदेवाअदधुर्भोजनानि॥एकाक्षरांद्विपदां
षट्पदांच॥वाचंदेवाउपजीवंतिवि श्वे॥वाचंदेवाउपजीवंति
विश्वे॥वाचंगंधर्वाःपशवोमनुष्याः॥वाचीमाविश्वाभुवनान्यर्पि
ता॥सानोहवंजुषतामिंद्रपत्नी॥वागक्षरंप्रथमजाऋतस्य॥वेदा
नांमाताऽमृतस्यनाभिः॥सानोजुषाणोपयज्ञमागात्॥अवंतीदे

॥१८॥

वीसुहवामेअस्तु॥यामृषयोमंत्रकृतोमनीषिणः॥अन्वैच्छंदेवास्तपसा
श्रमेण॥तांदेवींवाचंहविषायजामहे॥सानोदधातुसुकृतस्यलोके॥
कृ चत्वारिवाक्परिमितापदानि॥तानिविदुर्ब्राह्मणायेमनीषिणः॥गुहात्रीणि
निहितानेंगयंति॥तुरीयंवाचोमनुष्यावदंति॥श्रद्धयाग्निःसमिध्यते॥
श्रद्धयाविंदतेहविः॥श्रद्धांभगस्यमूर्धनि॥वचसावेदयामसि॥प्रि
यंश्रद्धेददतः॥प्रियंश्रद्धेदिदासतः॥प्रियंभोजेषुयज्वसु॥अस्मा
कमुदितंकृधि॥यथादेवाअसुरेषु॥श्रद्धामुग्रेषुचक्रिरे॥अस्माकं
मुदितंकृधि॥एवंभोजेषुयज्वसु॥श्रद्धांदेवायजमानाः॥वायुगोपा
उपासते॥श्रद्धांहृदय्ययाकूत्या॥श्रद्धयाहूयतेहविः॥श्रद्धांप्रा
इदमे३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१९॥ तंहवामहे ॥ श्रद्धांमध्यंदिनंपरि ॥ श्रद्धांसूर्यस्यनिम्रुचि ॥ श्रद्धेश्रद्धा
पयेहनः ॥ श्रद्धादेवानधिवस्ते ॥ श्रद्धाविश्वमिदंजगत् ॥ श्रद्धांकामस्यमा
तरं ॥ हविषावर्धयामसि ॥ ब्रह्मजज्ञानंप्रथमंपुरस्तात् ॥ विसीमतःसु
रुचोवेनआवः ॥ सबुध्नियाउपमाअस्यविष्ठाः ॥ सतश्चयोनिमसतश्चवि
वः ॥ पितावि राजामृषभोरयीणां ॥ अंतरिक्षंविश्वरूपआविवेश ॥
तमर्कैरभ्यर्चंतिवत्सं ॥ ब्रह्मसंतंब्रह्मणावर्धयंतः ॥ ब्रह्मदेवानजन
यत् ॥ ब्रह्मविश्वमिदंजगत् ॥ ब्रह्मणःक्षत्रंनिर्मितं ॥ ब्रह्मब्राह्म
णउत्थसद्म ॥ अंतरस्मिन्निमेलोकाः ॥ अंतर्विश्वमिदंजगत् ॥

ब्रह्मैवभूतानांज्येष्ठं ॥ तेनकोर्हतिस्पर्धितुं ॥ ब्रह्मन्देवास्त्रयस्त्रिंश
त् ॥ ब्रह्मन्निंद्रप्रजापती ॥ ब्रह्मन्हविश्वाभूतानि ॥ नावीवांतःसमाहि
ता ॥ चतस्रआशाःप्रचरंत्वग्नयः ॥ इमंनोयज्ञंनयतुप्रजानन् ॥ घृतं
पिन्वन्नजरंसुवीरं ॥ ब्रह्मसमिद्भवत्याहुतीनां ॥ आगावोअग्मन्नु
तभद्रमक्रन् ॥ सीदंतुगोष्ठेरणयंत्वस्मे ॥ प्रजावतीःपुरुरूपाइहस्युः ॥
इंद्रायपूर्वीरुषसोदुहानाः ॥ इंद्रोयज्वनेपृणतेचशिक्षति ॥ उपेद्द
दातिनस्वंमुषायति ॥ भूयोभूयोरयिमिदस्यवर्धयन् ॥ अभिन्ने
खिल्येनिदधातिदेवयुं ॥ नतानशंतिनदभातितस्करः ॥ नैनाअ
मित्रोव्यथिरादधर्षति ॥ देवांश्चयाभिर्यजतेददातिच ॥ ज्यो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उ.

२.

॥२१॥ गिनाभि सचतेगोपतिःसह ॥ नता अर्वारेणुककाटो अश्नुते ॥ नसं
स्कृतत्रमुपयंतिता अभि ॥ उरुगायमभयंतस्यता अनु ॥ गावो
मर्तस्यविचरंतियज्वनः ॥ गावोभगोगाव इंद्रोमे अच्छात् ॥ गावः
सोमस्यप्रथमस्यभक्षः ॥ इमाया गावः सजनासइंद्रः ॥ इच्छामी
द्धृदामनसाचिदिंद्रं ॥ यूयंगावोमेदयथाकृशंचित् ॥ अश्लीलंचि
त्कृणुथासुप्रतीकं ॥ भद्रंगृहंकृणुथभद्रवाचः ॥ बृहद्वोवय उच्य
तेसभासु ॥ प्रजावतीःसूयवसंरिशंतीः ॥ शुद्धा अपःसुप्रपाणे
पिबंतीः ॥ मावस्तेनईशतमाघशंसः ॥ परिवोहेतीरुद्रस्यवृंज्यात् ॥
उपेदमुपपर्चनं ॥ आसुगोषूपपृच्यतां ॥ उपर्षभस्यरेतसि ॥ उ

२.

पेंद्रतववीर्ये ॥ त्वासूर्याचंद्रमसाविश्वभद्रत्तमामहत् ॥ तेजोबसुमद्राजतो
दिवि ॥ सामात्मानाचेरतःसामचारिष्णा ॥ पयोधृतंनममेजातुदेवयोः ॥ उ
भावंतौपरियातअर्म्या ॥ दिवोनरश्मीस्तनुतोव्यर्णवे ॥ उभाभुवंती
भुवनाकविक्रतू ॥ सूर्यानचंद्राचरतोहतामती ॥ पतीद्युमद्विश्वविदाउ
भादिवः ॥ सूर्याउभाचंद्रमसाविचक्षणा ॥ विश्ववारावरिवोभावरेण्या ॥
तानोवतंमतिमंतामहिव्रता ॥ विश्ववपरीप्रतरणातरंता ॥ सुवर्विदादृ
शोपभूरिरश्मी ॥ सूर्याहिचंद्रावसुत्वेषदर्शता ॥ मनस्विनोभानुचरतो
नुसंदिवं ॥ अस्यश्रवोनद्यःसप्तबिभ्रति ॥ द्यावाक्षामापृथिवीदर्शतं
वपुः ॥ अस्मेसूर्याचंद्रमसाभिचक्षे ॥ श्रद्धेकमिंद्रचरतोविचर्तुरं ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उ० ॥

॥१२॥ पूर्वापरं चरतो माययैतौ ॥ शिशू क्रीडंतौ परि यातो अध्वरं ॥ विश्वान्यन्यो ६०
भुवनाभिचष्टे ॥ ऋतूंरन्यो विदधज्जायते पुनः ॥ हिरण्यवर्णाः शुचयः
पावका यासु जातः कश्यपो यास्विंद्रः ॥ अग्निं या गर्भं दधिरे विरूपास्ता
न आपः शं स्योना भवंतु ॥ यासां राजा वरुणो याति मध्ये सत्यानृते अव
पश्यं जनानां ॥ मधुश्चुतः शुचयो याः पावकास्ता न ॥ यासां देवा दिवि कृण्वं
ति भक्षं या अंतरिक्षे बहुधा भवंति ॥ याः पृथिवीं पयसोंदंति शुक्रास्ता न॰
शिवेन मा चक्षुषा पश्यतापः शिवया तन्वोप स्पृशत त्वचं मे ॥ सर्वां
अग्नींरप्सुषदो हुवे वो मयि वर्चो बलमोजो नि धत्त ॥ आपो भद्रा
घृतमिदाप आसुरग्नीषोमौ विभ्रत्याप इत्ताः ॥ तीव्रो रसो मधुपृचा

मरंगम आ मा प्राणेन सह वर्चसा गन् ॥ आदित्पश्याम्युत वा शृणो
म्या मा घोषो गच्छति वाङ् न आसां ॥ मन्ये भेजानो अमृतस्य तर्हि हि
रण्यवर्णा अतृपं यदा वः ॥ नासदासीन्नो सदासीत्तदानीं ॥ नासीद्र
जो नो व्योमा परो यत् ॥ किमावरीवः कुह कस्य शर्मन् ॥ अंभः किमा
सीद्गहनं गभीरं ॥ न मृत्युरमृतं न तर्हि न ॥ रात्रिया अह्न आसीत्प्रके
तः ॥ आनीदवातं स्वधया तदेकं ॥ तस्माद्धान्यं न परः किंचना
स ॥ तम आसीत्तमसा गूढमग्रे प्रकेतं ॥ सलिलं सर्वमा इदं ॥
तुच्छेनाभ्वपिहितं यदासीत् ॥ तमसस्तन्महिना जायतैकं ॥ कामस्त
दग्रे समवर्तताधि ॥ मनसो रेतः प्रथमं यदासीत् ॥ सतो बंधुम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उ. ६

॥२२॥ सतिनिरविंदन्॥हृदिप्रतीष्याकवयोमनीषा॥तिरश्चीनोविततोर
श्मिरेषां॥अधःस्विदासी३दुपरिस्विदासी३त्॥रेतोधाआसन्
महिमानआसन्॥स्वधाअवस्तात्प्रयतिःपरस्तात्॥कोअद्धावे
दकइहप्रवोचत्॥कुतआजाताकुतइयंविसृष्टिः॥अर्वाग्देवा
अस्यविसर्जनेनाथ॥अथाकोवेदयतआबभूव॥इयंविसृष्टि
र्यतआबभूव॥यदिवादधेयदिवान॥योअस्याध्यक्षःपर
मेव्योमन्॥सोअंगवेदयदिवानवेद॥किंस्विद्वनंकउसवृ
क्षआसीत्॥यतोद्यावापृथिवीनिष्टतक्षुः॥मनीषिणोमन
सापृच्छतेदुतत्॥

१२

यदध्यतिष्ठद्भुवनानिधारयन्॥ब्रह्मवनंब्रह्मसवृक्षआसीत्॥यतोद्या
वापृथिवीनिष्टतक्षुः॥मनीषिणोमनसाविब्रवीमिवः॥ब्रह्माध्यतिष्ठ
द्भुवनानिधारयन्॥प्रातरग्निंप्रातरिंद्रंहवामहे॥प्रातर्मित्रावरु
णाप्रातरश्विना॥प्रातर्भगंपूषणंब्रह्मणस्पतिं॥प्रातःसोममुतरुद्रं
हुवेम॥प्रातर्जितंभगमुग्रंहुवेम॥वयंपुत्रमदितेर्योविधर्ता॥
आध्रश्चिद्यंमन्यमानस्तुरश्चित्॥राजाचिद्यंभगंभक्षीत्याह॥भ
गप्रणेतर्भगसत्यराधः॥भगेमांधियमुदवाददन्नः॥भगप्रणोज
नयगोभिरश्वैः॥भगप्रनृभिर्नृवंतःस्याम॥उतेदानींभगवंतः
स्याम॥उतप्रपित्वउतमध्येअह्नां॥उतोदितामघवन्सूर्यस्य॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उ. ६०

॥२३॥ वयं देवानां सुमतौ स्याम ॥ भग एव भगवां अस्तु देवाः ॥ तेन व
यं भगवंतः स्याम ॥ तं त्वा भग सर्व इज्जोहवीमि ॥ स नो भग पुर एता
भवेह ॥ समध्वरायोषसो नमंत ॥ दधिक्रावेव शुचये पदाय ॥ अ
र्वाचीनं वसुविदं भगं नः ॥ रथमिवाश्वा वाजिन आवहंतु ॥ अश्वावती न४
र्गोमतीर्न उषासः ॥ वीरवतीः सदमुच्छंतु भद्राः ॥ घृतं दुहाना विश्वतः
त४ प्रपीनाः ॥ यूयं पात स्वस्तिभिः सदा नः ॥ अग्निर्नः पातु कृत्तिकाः ॥ नक्षत्रं
देवमिंद्रियं ॥ इदमासां विचक्षणं ॥ हविरासं जुहोतन ॥ यस्य भांति र
श्मयो यस्य केतवः ॥ यस्येमा विश्वा भुवनानि सर्वा ॥ स कृत्तिकाभिरभि
संवसानः ॥ अग्निर्नो देवः सुविते दधातु ॥ यथा जीवेम शरदः सवीराः ॥
\+ प्रजापते रोहिणी वेतु पत्नी ॥ विश्वरूपा बृहती चित्रभानुः ॥ सा नो यज्ञस्य सुविते दधातु ॥ १ +

२३

रोहिणी देव्युदगात्पुरस्तात् ॥ विश्वा रूपाणि प्रतिमोदमाना ॥ प्रजापतिं हविषा
वर्धयंती ॥ प्रिया देवानामुपयातु यज्ञं ॥ सोमो राजा मृगशीर्षेणागन् ॥ शिवं
नक्षत्रं प्रियमस्य धाम ॥ आप्यायमानो बहुधा जनेषु ॥ रेतः प्रजां यजमाने
दधातु ॥ यत्ते नक्षत्रं मृगशीर्षमस्ति ॥ प्रियं राजन् प्रियतमं प्रियाणां ॥
तस्मै ते सोम हविषा विधेम ॥ शं न एधि द्विपदे शं चतुष्पदे ॥ आर्द्रया रुद्रः
प्रथमान एति ॥ श्रेष्ठो देवानां पतिरघ्नियानां ॥ नक्षत्रमस्य हविषा विधे
म ॥ मा नः प्रजां रीरिषन्मोत वीरान् ॥ हेती रुद्रस्य परिणो वृणक्तु ॥ आर्द्रा
नक्षत्रं जुषतां हविर्नः ॥ प्रमुंचमानौ दुरितानि विश्वा ॥ अपाघशंसं
नुदतामरातिं ॥ पुनर्नो देव्यदितिस्पृणोतु ॥ पुनर्वसू नः पुनरेतां यज्ञं ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३० २०

१२५॥ पुनर्नोदेवाअभियंतुसर्वे॥पुनःपुनर्वोहविषायजाम॥एवानदेव्यदिति
रनर्वा॥विश्वस्यभर्त्रीजगतःप्रतिष्ठा॥पुनर्वसूहविषावर्धयंती॥प्रियं
देवानामप्येतुपाथः॥बृहस्पतिःप्रथमंजायमानः॥तिष्येणनक्षत्रमभिसं
बभूव॥श्रेष्ठोदेवानांपृतनासुजिष्णुः॥दिशोनुसर्वाअभयंनोअस्तु॥
तिष्यःपुरस्तादुतमध्यतोनः॥बृहस्पतिर्नःपरिपातुपश्चात्॥बाधेतां
द्वेषोअभयंकृणुतां॥सुवीर्यस्यपतयःस्याम॥इदंसर्पेभ्योहविरस्तुजुष्टं॥
अं आश्रेषायेषामनुयंतिचेतः॥येअंतरिक्षंपृथिवींक्षियंति॥तेनःसर्पा
सोहवमागमिष्ठाः॥येरोचनेसूर्यस्यापिसर्पाः॥येदिवंदेवीमनुसंचरं
ति॥येषामाश्रेषाअनुयंतिकामं॥तेभ्यःसर्पेभ्योमधुमज्जुहोमि॥उपहू
ताःपितरोयेमघासु॥मनोजवसःसुकृतःसुकृत्याः॥तेनोनक्षत्रे

२५

हवमागमिष्ठाः॥स्वधाभिर्यज्ञंप्रयतंजुषंतां॥येअग्निदग्धायेऽनग्निदग्
धाः॥येमुंलोकंपितरःक्षियंति॥यांश्चविद्मयांउचनप्रविद्म॥म
घासुयज्ञंसुकृतंजुषंतां॥गवांपतिःफल्गुनीनामसित्वं॥तदर्यमन्वरुणमि
त्रचारु॥तंत्वावयंसनितारंसनीनां॥जीवाजीवंतमुपसंविशेम॥ये
नेमाविश्वाभुवनानिसंजिता॥यस्यदेवाअनुसंयंतिचेतः॥अर्यमारा
जाजरस्तुविष्मान्॥फल्गुनीनामृषभोरोरवीति॥श्रेष्ठोदेवानांभगवो
भगासि॥तत्त्वाविदुःफल्गुनीस्तस्यवित्तात्॥अस्मभ्यंक्षत्रमजरंसुवीर्यं॥
गोमदश्ववदुपसंनुदेह॥भगोहदाताभगइत्प्रदाता॥भगोदेवीःफल्गुनी
राविवेश॥भगस्येत्तंप्रसवंगमेम॥यत्रदेवैःसधमादंमदेम॥आयातु
देवःसवितोपयातु॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२५॥ हिरण्ययेन सुवृता रथेन ॥ वहतु सत्यं सुभगं वियूनापसे ॥ प्रयच्छं तंपपु
रिं पुरस्य मच्छ ॥ हस्तः प्रयच्छत्वमृतं वसीयः ॥ दक्षिणेन प्रतिगृभ्णीम एन
त् ॥ दातारमद्य सविता विदेय माकं ॥ निवेशाय नमसा ॥ यो नो हस्ता
य प्रसुवाति यज्ञं ॥ त्वष्टा नक्षत्रमभ्येति चित्रां ॥ सुभं संसं युवतिं रोच
मानां ॥ निवेशयन्नमृतान्मर्त्यांश्च ॥ रूपाणि पिंशन्भुवनानि विश्वा ॥
तन्नस्त्वष्टा तदु चित्रा विचष्टां ॥ तन्नक्षत्रं भूरिदा अस्तु मह्यं ॥ तन्नः प्रजां
धिरवतिं सनोतु ॥ गोभिर्नो अश्वैस मनक्तु यज्ञं ॥ वायुर्नक्षत्रमभ्येति नि
ष्ट्यां ॥ तिग्मशृंगो वृषभो रोरुवाणः ॥ समीरयन्भुवना मातरिश्वा ॥ अप द्वे
षांसि नुदतामरातीः ॥ तन्नो वायुस्तदु निष्ट्या शृणोतु ॥ तन्नक्षत्रं भूरिदा
अस्तु मह्यं ॥

नि॰

तन्नो देवासो अनुजानंतु कामं ॥ यथा तरेम दुरितानि विश्वा ॥ दूरमस्म
च्छत्रवो यंतु भीताः ॥ तदिंद्राग्नी कृणुतां तद्विशाखे ॥ तन्नो देवा अनुमदं
तु यज्ञं ॥ पश्चात्पुरस्तादभयन्नो अस्तु ॥ नक्षत्राणामधिपत्नी विशाखे ॥
श्रेष्ठाविंद्राग्नी भुवनस्य गोपौ ॥ विषूचः शत्रूनपबाधमानौ ॥ अप क्षु
धं नुदतामरातिं ॥ पूर्णा पश्चादुत पूर्णा पुरस्तात् ॥ उन्मध्यतः पौर्णमासी
जिगाय ॥ तस्यां देवा अधि संवसंतः ॥ उत्तमे नाक इह मादयंतां ॥ पृथ्वी
सुवर्चा युवतिः सजोषाः ॥ पौर्णमास्युदगाच्छोभमाना ॥ आप्याययंती
दुरितानि विश्वा ॥ उरुं दुहां यजमानाय यज्ञं ॥ ऋध्यास्म हव्यैर्नमसो
पसद्य ॥ मित्रं देवं मित्रधेयं नो अस्तु ॥ अनूराधान्हविषा वर्धयंतः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२५॥ श्रुतं जीवेम शरदः सवीराः ॥ चित्रं नक्षत्र मुदगात्पुरस्तात् ॥ अनूराधा
स इति यद्वदंति ॥ तन्मित्र एति पथिभिर्देवयानैः ॥ हिरण्ययैर्विततैरंतरिक्षे ॥
इंद्रो ज्येष्ठामनु नक्षत्रमेति ॥ यस्मिन्वृत्रं वृत्रतूर्ये ततार ॥ तस्मिन्वयममृतं दुहा
हाना ॥ क्षुधं तरेम दुरितिं दुरिष्टिं ॥ पुरंदराय वृषभाय धृष्णवे ॥ अषाढा
य सहमानाय मीढुषे ॥ इंद्राय ज्येष्ठा मधुमद्दुहाना ॥ उरुं कृणोतु यजमाना
य लोकं ॥ मूलं प्रजां वीरवतीं विदेय ॥ पराच्येतु निर्ऋतिः पराचा ॥ गोभिर्नक्ष
त्रं पशुभिः समक्तं ॥ अहर्भूयाद्यजमानाय मह्यं ॥ अहर्नो अद्य सुविते द
धातु ॥ मूलं नक्षत्रमिति यद्वदंति ॥ पराचीं वाचा निर्ऋतिं नुदामि ॥ शिवं
प्रजायै शिवमस्तु मह्यं ॥ या दिव्या आपः पयसा संबभूवुः ॥ या अंतरि

क्ष उत पार्थिवीर्याः ॥ यासामषाढा अनुयंति कामं ॥ ता न आपः शंस्योना भ
वंतु ॥ याश्च कूप्या याश्च नाद्याः समुद्रियाः ॥ याश्च वैशंतीरुत प्रासचीर्याः ॥
यासामषाढा मधु भक्षयंति ॥ ता न आपः शंस्योना भवंतु ॥ तन्नो विश्वे उ
प शृण्वंतु देवाः ॥ तदषाढा अभिसंयंतु यज्ञं ॥ तन्नक्षत्रं प्रथतां पशुभ्यः ॥
कृषिर्वृष्टिर्यजमानाय कल्पतां ॥ शुभ्राः कन्या युवतयः सुपेशसः ॥ कर्मकृ
तः सुकृतो वीर्यावतीः ॥ विश्वान्देवान्हविषा वर्धयंतीः ॥ अषाढाः काममु
पयांतु यज्ञं ॥ यस्मिन्ब्रह्माभ्यजयत्सर्वमेतत् ॥ अमुं च लोकमिदमू च स
र्वं ॥ तन्नो नक्षत्रमभिजिद्विजित्य ॥ श्रियं दधात्वहृणीयमानं ॥ उभौ
लोकौ ब्रह्मणा संजितेमौ ॥ तन्नो नक्षत्रमभिजिद्विचष्टां ॥ तस्मिन्वयं
पृतनाः संजयेम ॥ तन्नो देवासो अनुजानंतु कामं ॥ शृण्वंति श्रोणा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२७॥ मृमृतस्य गोपा ॥ पुल्यामस्या उपश्रृरो भिवाचं ॥ मही देवी विस्नुपत्नीमजूर्यां ॥ प्र
तीचीमेनां हविषा यजामः ॥ त्रेधा विस्नुरुरुगायो विचक्रमे ॥ मही दिवं पृथिवी
मंतरिक्षं ॥ तच्छ्रोणेति श्रव इछमाना ॥ पुण्यं श्लोकं यजमानाय कृण्वती ॥
अष्टौ देवा वसवः सोम्यासः ॥ चतस्रो देवीरजराः श्रविष्ठाः ॥ ते यज्ञं पांतु रजसः पु ता
रस्तात् ॥ संवत्सरीणममृतं स्वस्ति ॥ यज्ञं नः पांतु वसवः पुरस्तात् ॥ दक्षिण
तोभियंतु श्रविष्ठाः ॥ पुण्यं नक्षत्रमभिसंविशाम ॥ मा नो अरातिरघ
शंसागन् ॥ क्षत्रस्य राजा वरुणोधिराजः ॥ नक्षत्राणां शतभिषग्वसि
ष्ठः ॥ तौ देवेभ्यः कृणुतो दीर्घमायुः ॥ शतं सहस्रा भेषजानि धत्तः ॥ यज्ञं नो
राजा वरुण उपयातु ॥ तन्नो विश्वे अभिसंयंतु देवाः ॥ तन्नो नक्षत्रं शतभिषग्जु
षाणं ॥ दीर्घमायुः प्रतिरद्भेषजानि ॥ अज एकपादुदगात्पुरस्तात् ॥ विश्वा भूता
नि प्रतिमोदमानः ॥ तस्य देवाः प्रसवं यंति [illegible] ॥ सर्वे ॥ प्रोष्ठपदासो अमृ

तस्य गोपाः ॥ विभ्राजमानः समिधान उग्रः ॥ आंतरिक्षमरुहदगंद्यां ॥ तं सूर्यं
देवमजमेकपादं ॥ प्रोष्ठपदासो अनुयंति सर्वे ॥ अहिर्बुध्नियः प्रथमान एति ॥
श्रेष्ठो देवानामुत मानुषाणां ॥ तं ब्राह्मणाः सोमपाः सोम्यासः ॥ प्रोष्ठपदासो
अभिरक्षंति सर्वे ॥ चत्वार एकमभि कर्म देवाः ॥ प्रोष्ठपदास इति यान्वदं
ति ॥ ते बुध्नियं परिषद्यं स्तुवंतः ॥ अहिं रक्षंति नमसोपसद्य ॥ पूषा रे
वत्यन्वेति पंथां ॥ पुष्टिपती पशुपा वाजबस्त्यौ ॥ इमानि हव्या प्रयता जुषाणा ॥
सुगैर्नो यानैरुपयातां यज्ञं ॥ क्षुद्रान्पशून्रक्षतु रेवती नः ॥ गावो नो अश्वां
अन्वेतु पूषा ॥ अन्नं रक्षंतौ बहुधा विरूपं ॥ वाजं सनुतां यजमाना
य यज्ञं ॥ तदश्विनावश्वयुजोपयातां ॥ शुभं गमिष्ठौ सुयमेभिरश्वैः ॥ स्वं नक्ष
त्रं हविषा यजंतौ ॥ मध्वा संपृक्तौ यजुषा समक्तौ ॥ यौ देवानां भिषजौ ह

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२९॥ यथाहौविश्वस्य द्रुतावमस्तस्यगोपौ॥तौनक्षत्रं जुजुषाणोपयातां॥नमोश्विभ्यां
कृणुमोश्वयुग्भ्यां॥अपपाप्मानं भरणीर्भरंतु॥तद्यमोराजाभगवान्वि
चष्टां॥लोकस्यराजामहतोमहान्हि॥सुगंनः पंथामभयंकृणोतु॥यस्मिन्
क्षत्रेयमएतिराजा॥यस्मिन्नेनमभ्यषिंचंतदेवाः॥तदस्यचित्रंहविषाय
पा ८ जाम॥अपपाप्मानं भरणीर्भरंतु॥निवेशनीसंगमनीवसूनांविश्वारूपाणि
वसून्यावेशयंती॥सहस्रपोषंसुभगारराणासानआगन्वर्चसासं
विदाना॥यत्तेदेवाअदधुर्भागधेयममावास्येसंवसंतोमहित्वा॥सानो
यज्ञंपिपृहिविश्ववारे रयिंनोधेहिसुभगेसुवीरं॥११॥नवोनवोभवति
जायमानोन्हांकेतुरुषसामेत्यग्रे॥भागंदेवेभ्योविदधात्यायन्प्रचंद्रमास्ति
रतिदीर्घमायुः॥यमादित्याअंशुमाप्याययंति यमक्षितिंतयःपिबंति॥ते

मक्षित ८

नेनोराजावरुणोबृहस्पतिराप्याययंतुभुवनस्यगोपाः॥येपिरूपसमनसासं
ता ८ चयंती॥समानंतंतुंपरितातनाते॥विभुंप्रभुंअनुभूंविश्वतौहुवे॥तेनो
नक्षत्रेहवमागमेतं॥वयंदेवीब्रह्मणासंविदानाः॥सुरत्नासोदेववीतिं
दधानाः॥अहोरात्रेहविषावर्धयंतः॥अतिपाप्मानमतिमुक्त्यागमेम॥
प्रसुवद्भ्यां तीं॥व्युच्छंतीदुहितादिवः॥आपोमहीवृणुतेचक्षुषा॥तमो
ज्योतिष्कृणोतिसूनरी॥उदुस्त्रियाः सचतेसूर्यः॥सचाउद्यन्नक्षत्रमर्चि
मत्॥तवेदुषोव्युषिसूर्यस्यच॥संभक्तेनगमेमहि॥तन्नोनक्षत्रमर्चि
मत्॥भानुमत्तेजउच्चरत्॥उपयज्ञमिहागमत्॥प्रनक्षत्रायदेवा
य॥इंद्रायेंदुंहवामहे॥सनःसवितासुवत्सनिं॥पुष्टिदांवीरवत्तमं॥
उदुत्यंजातवेदसंदेवंवहंतिकेतवः॥दृशेविश्वाय सूर्यं॥चित्रंदेवा

नां ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२६॥ नामुद्गादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः॥ आप्रा द्यावापृथिवी अंत
रिक्षं सूर्य आत्मा जगतस्तस्थुषश्च॥ अदितिर्न उरुष्यत्वदितिः शर्म य
च्छतु॥ अदितिः पात्वंहसः॥ महीमूषु मातरं सुव्रतानामृतस्य पत्नीमव
से हुवेम॥ तुविक्षत्रामजरंतीमुरूचीं सुशर्माणमदितिं सुप्रणीतिं॥
इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं॥ समूढमस्य पांसुरे॥ प्रतद्विष्णुस्त
वते वीर्याय॥ मृगो न भीमः कुचरो गिरिष्ठाः॥ यस्योरुषु त्रिषु विक्रमणेषु॥
अधिक्षियंति भुवनानि विश्वा॥ अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या
अयं॥ अपां रेतांसि जिन्वति॥ भुवो यज्ञस्य रजसश्च नेता यत्रा नियु
द्भिः सचसे शिवाभिः॥ दिवि मूर्धानं दधिषे स्वर्षां जिह्वामग्ने चकृषे हव्य
वाहं॥

अनु नोद्यानुमतिर्यज्ञं देवेषु मन्यतां॥ अग्निश्च हव्यवाहनो भवतां दाशुषे मयः॥
अन्विदनुमते त्वं मन्यासै शं च नः कृधि॥ क्रत्वे दक्षाय नो हिनु प्रण आयूं
षि तारिषः॥ हव्यवाहमभिमातिषाहं॥ रक्षोहणं पृतनासु जिष्णुं॥ ज्योतिष्म
न्तं दीद्यतं पुरंधिं॥ अग्निं स्विष्टकृतमाहुवेम॥ स्विष्टमग्ने अभितत्पृणा
हि॥ विश्वा देव पृतना अभिष्य॥ उरुं नः पंथां प्रदिशन्विभाहि॥ ज्योति
ष्मद्धेह्यजरं न आयुः॥ अग्नये स्वाहा कृत्तिकाभ्यः स्वाहा॥ अंबायै स्वाहा
दुलायै स्वाहा॥ नितत्न्यै स्वाहा अभ्रयंत्यै स्वाहा॥ मेघयंत्यै स्वाहा वर्षयंत्यै स्वा
हा॥ चुपुणीकायै स्वाहा॥१॥ प्रजापतये स्वाहा रोहिण्यै स्वाहा॥ रोचमानायै
स्वाहा प्रजाभ्यः स्वाहा॥२॥ सोमाय स्वाहा मृगशीर्षाय स्वाहा॥ इन्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥३०॥ काभ्युः स्वाहौषधीभ्यस्वाहा ॥ राज्यायस्वाहाभिजित्यैस्वाहा ॥३॥ रुद्रायस्वा
हार्द्रायैस्वाहा ॥ पिन्चमानायै स्वाहापशुभ्युः स्वाहा ॥४॥ अदित्यैस्वाहापु
नर्वसुभ्यांस्वाहा ॥ भूत्यैस्वाहाप्रजात्यैस्वाहा ॥५॥ बृहस्पतयेस्वाहाति
ष्यायस्वाहा ॥६॥ सर्पेभ्युः स्वाहाश्रेषाभ्युः स्वाहा ॥ दंदशूकेभ्युः स्वाहा ॥७॥
पितृभ्युः स्वाहामघाभ्युः ॥ स्वाहानघाभ्युः स्वाहागृहाभ्युः ॥ स्वाहारूधती
भ्युः स्वाहा ॥८॥ अर्यम्णेस्वाहाफल्गुनीभ्यां स्वाहा ॥ पशुभ्युः स्वाहा ॥९॥
भगायस्वाहाफल्गुनीभ्यां स्वाहा ॥ श्रैष्ठ्यायस्वाहा ॥१०॥ सवित्रेस्वाहा
हस्ताय ॥ स्वाहाददतेस्वाहापृणते ॥ स्वाहाप्रयच्छतेस्वाहाप्रतिगृभ्णतेस्वा
हा ॥११॥ त्वष्ट्रेस्वाहाचित्रायैस्वाहा ॥ चैत्रायस्वाहाप्रजायैस्वाहा ॥१२॥

वायवेस्वाहानिष्ट्यायैस्वाहा ॥ कामचारायस्वाहाभिजित्यैस्वाहा ॥१३॥ इन्द्रा
ग्निभ्यां स्वाहाविशाखाभ्यां स्वाहा ॥ श्रैष्ठ्यायस्वाहाभिजित्यैस्वाहा ॥
पौर्णमास्यैस्वाहाकामायस्वाहा ॥ गत्यैस्वाहा ॥१५॥ मित्रायस्वाहानुराधे
भ्युः स्वाहा ॥ मित्रधेयायस्वाहाभिजित्यैस्वाहा ॥१६॥ इन्द्रायस्वाहाज्येष्ठा
यैस्वाहा ॥ ज्यैष्ठ्यायस्वाहाभिजित्यैस्वाहा ॥१७॥ प्रजापतयेस्वाहामूलाय
स्वाहा ॥ प्रजायैस्वाहा ॥१८॥ अद्भ्युः स्वाहाषाढाभ्युः स्वाहा ॥ अं नं पं जैय्यां
यैस्वाहाजित्यैस्वाहा ॥ समुद्रायस्वाहाकामायस्वाहा ॥ अभिजित्यैस्वाहा ॥
विश्वेभ्योदेवेभ्युः स्वाहा ॥ षाढाभ्युः स्वाहा ॥ अनपजय्यायस्वाहाजित्यै
स्वाहा ॥२०॥ ब्रह्मणेस्वाहाभिजितेस्वाहा ॥ ब्रह्मलोकायस्वाहाभिजि
त्यैस्वाहा ॥२१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥३१॥ विस्मयेस्वाहा श्रोणायैस्वाहा ॥ श्लोकायस्वाहा श्रुतायस्वाहा ॥२२॥ वसुभ्यःस्वा
हा श्रविष्ठाभ्यःस्वाहा ॥ अग्रायस्वाहा परिस्रैस्वाहा ॥२३॥ वरुणायस्वाहा
शतभिषजेस्वाहा ॥ भेषजेभ्यःस्वाहा ॥२४॥ अजायैकपदेस्वाहा प्रोष्ठप
भ्यः देस्वाहा ॥ तेजसेस्वाहा ब्रह्मवर्चसायस्वाहा ॥२५॥ अहयेबुध्नियायस्वा
हा प्रोष्ठपदेभ्यःस्वाहा ॥ प्रतिष्ठायैस्वाहा ॥२६॥ पूष्णेस्वाहा रेवत्यैस्वाहा ॥
पशुभ्यःस्वाहा ॥२७॥ अश्विभ्यांस्वाहा अश्वयुग्भ्यांस्वाहा ॥ श्रोत्रायस्वा
हा श्रुत्यैस्वाहा ॥२८॥ यमायस्वाहा अपभरणीभ्यःस्वाहा ॥ राज्यायस्वाहा
भिर्तिस्यैस्वाहा ॥२९॥ अमावास्यायैस्वाहा कामायस्वाहा ॥ गत्यैस्वाहा ॥३०
चंद्रमसेस्वाहा प्रतीदृश्यायैस्वाहा ॥ अहोरात्रेभ्यःस्वाहा अर्धमासेभ्यःस्वा
हा ॥ मासेभ्यःस्वाहा ऋतुभ्यःस्वाहा ॥ संवत्सरायस्वाहा ॥३१॥ अर्केस्वाहा रा

त्र्यैस्वाहा ॥ अतिमु[illegible]कायैस्वाहा ॥३२॥ उषसेस्वाहा व्युष्ट्यैस्वाहा ॥ व्यु
षुष्यैस्वाहा व्युष्ट्यै यैस्वाहा ॥ व्युष्टायैस्वाहा ॥३३॥ नक्षत्रायस्वाहा देष्यते
स्वाहा ॥ उद्यतेस्वाहा दिवायस्वाहा ॥ हरसेस्वाहा भरसेस्वाहा ॥ भ्राजसेस्वा
हा तेजसेस्वाहा ॥ तपसेस्वाहा ब्रह्मवर्चसायस्वाहा ॥३४॥ सूर्यायस्वाहा न
क्षत्रेभ्यःस्वाहा ॥ प्रतिष्ठायैस्वाहा ॥३५॥ अदित्यैस्वाहा प्रतिष्ठायैस्वाहा ॥
विष्णवेस्वाहा यज्ञायस्वाहा ॥ प्रतिष्ठायैस्वाहा ॥३६॥ दधिक्राव्णोअकारि
षंजिष्णोरश्वस्यवाजिनः ॥ सुरभिनोमुखाकरत्प्रण आयूंषितारिषत् ॥
आपोहिष्ठामयोभुवस्तानऊर्जेदधातन ॥ महेरणायचक्षसे ॥ योवः
शिवतमोरसस्तस्यभाजयतेहनः ॥ उशतीरिवमातरः ॥ तस्माअरं
गमामवोयस्यक्षयायजिन्वथ ॥ उ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उ. द.

॥३२॥ अपोंन्नन यपाचन:॥यच्छिधितेविरोंपधाप्रहैवरूणा भुतं॥पुनीमखिध
विघ्यवि॥यत्किंचेदंवरूणा दैव्येजनेभि द्रोहंमनुष्याश्चरांमसि॥अचित्ति
यत्तवधर्मायुयोपिमानस्तस्मादेनसोदेवरीरिषः॥कितवासोयद्रिरिपु
र्नदीविपद्वाघासत्यमुतयन्नविद्म॥सर्वाताविष्यशिथिरवेदेवाथातेस्या
मवरूणप्रियास:॥हिरण्यवर्णाःशुचयःपाकोवःयासुजातःकश्यपोयास्विं
द्रः॥अग्निंयागर्भंदधिरेविरूपास्तानअपश्शंस्योनाभवंतु॥यासांराजा
वरूणोयातिमध्येसत्यानृतेअवपश्यंजनानां॥मधुश्चुत:शुचयोयाः
पावकाःस्तानः॥यासांदेवादिविकृण्वंतिभक्षंयाअंतरिक्षेबहुधाभवंति॥
याःपृथिवीपयसोंदंतिशुक्रास्तान॥शिवेनमाचक्षुषापश्यतापःशिव
यातनुवोपस्पृशतत्वचंमे॥सर्वांअग्नीरप्सुषदोहुवेवोमयिवर्चो

बलमोजोनिधत्त॥पवमानस्सुवर्जन:॥पवित्रेणविचर्षणि:॥यःपोतासपु
नातुमा॥पुनंतुमादेवजना:॥पुनंतुमनवोधिया॥पुनंतुविश्वआयव:॥
जातवेदःपवित्रं वत्॥पवित्रेणपुनाहिमा॥शुक्रेणदेवदीद्यत्॥अग्ने
क्रत्वाक्रतूंरनु॥यत्तेपवित्रमर्चिषि॥अग्नेविततमंतरा॥ब्रह्मतेन
पुनीमहे॥उभाभ्यांदेवसवितः॥पवित्रेणसवेनच॥इदंब्रह्मपुनीम
हे॥वैश्वदेवीपुनतीदेव्यागात्॥यस्यैबह्वीस्तनुवोवीतपृष्ठाः॥तयाम
दंतः सधमाद्येषु॥वयंस्यामपतयोरयीणां॥वैश्वानरोरश्मिभिर्मा
पुनातु॥वातःप्राणेनेषिरोमयोभू:॥द्यावापृथिवीपयसापयोभिः॥
ऋतावरीयज्ञियेमापुनीतां॥बृहद्भिः सवितस्तृभि:॥वर्षिष्ठैर्दे
वमन्मभि:॥अग्नेदक्षैःपुनाहिमा॥येनदेवाअपुनत॥येनापोदि
व्यंकशः॥तेनदिव्येनब्रह्मणा॥इदंब्रह्मपुनीमहे॥यःपावमानीरध्ये

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥३३॥ ति॥ ऋषिभिः संभृतं रसं॥ सर्वं पूतमश्नाति॥ स्वदितं मातरिश्वना॥ पावमानीर्यो अध्येति॥ ऋषिभिः संभृतं रसं॥ तस्मै सरस्वती दुहे॥ क्षीरं सर्पिर्मधूदकं॥ पावमानीः स्वस्त्ययनीः॥ सुदुघाहि पयस्वतीः ऋषिभिः संभृतो रसः॥ ब्राह्मणेष्वमृतं हितं॥ पावमानीर्दिशंतु नः॥ इमं लोकमथो अमुं॥ कामान्समर्धयंतु नः॥ देवीर्देवैः समाभृताः॥ पावमानीः स्वस्त्ययनीः॥ सुदुघाहि घृतश्चुतः॥ ऋषिभिः संभृतो रसः॥ ब्राह्मणेष्वमृतं हितं॥ येन देवाः पवित्रेण॥ आत्मानं पुनते सदा॥ तेन सहस्रधारेण॥ पावमान्यः पुनंतु मा॥ प्राजापत्यं पवित्रं॥ शतोद्यामं हिरण्मयं॥ तेन ब्रह्मविदो वयं॥ पूतं ब्रह्म पुनीमहे॥ इंद्रः सुनीती सह मा पुनातु॥ सोमः स्वस्त्या वरुणः समीच्या॥ यमो राजा प्रमृणाभिः पुनातु मा॥ जातवेदा मोर्जयंत्या पुनातु॥ भूर्भुवः स्वः॥ तच्छंयोरावृणीमहे॥ गातुं यज्ञाय॥ ॥३३॥

गातुं यज्ञपतये॥ दैवीः स्वस्तिरस्तु नः॥ स्वस्तिर्मानुषेभ्यः॥ ऊर्ध्वं जिगातु भेषजं॥ शं नो अस्तु द्विपदे॥ शं चतुष्पदे॥ नमो ब्रह्मणे नमो अस्त्वग्नये नमः पृथिव्यै नम ओषधीभ्यः॥ नमो वाचे नमो वाचस्पतये नमो विष्णवे बृहते करोमि॥ ॐ इमं भूर्भुवस्सुवः ॐ ३ मः शांतिः शांतिः शांतिः॥ प्रणवेनोत्थाप्य॥ व्याहृतीभिश्च प्रोक्षति॥ तेन मंत्रेणाभिषेकः॥ दधिक्राव्णो आपो हिष्ठा पवित्रेति हिरण्यवर्णा या सां राजा या सां देया पवमानः सुवर्जनेन इत्यनुवाकं देवस्य त्वेति सुक्तेत्यभिषेकः॥ इत्युदकशांतिसमाप्ता॥ श्रीतुळजादेव्यै नमः॥ अथ प्रतिसरबंधः॥ अथोदकशांति प्रतिसरबंध पीरक कालकर्तव्यत्व प्रसक्तोऽसमानतंत्र प्रयोगः॥ संकल्प उदकशांति प्रतिसरबंधं च तंत्रेण करिष्ये॥ प्रतिसकल

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥३५॥ स्थंडिलकरणादि॥ब्रह्मपात्रप्रोक्षणकाले प्रतिसरसूत्रेण प्रोक्ष्य॥स्थं
डिले ब्रह्मपात्रं निधाय॥तत्पुरतः शालितंदुलपूरितकांस्यपात्रोपरि
प्रतिसरसूत्रं च निधाय॥परिस्तरणादि कुंभं प्रतिसरसूत्रं चान्वारभ्य
जपति॥स्रुगुत्पात्रेस्मनुवाकोनेमर्देचिदस्येस्पर्धं चेत्येषु जपित्वा॥
पवमानः सुवर्जनइत्यनुवाकेन॥हिरण्यवर्णाः शुचयः पावका इति चत
स्रणामंते॥पदरः संप्रतीरत्तावतनदत्ताहतेइत्यादि ब्रं त्वमग्ने च सप्तेयेस्तु
धावं जपित्वा पवमानः सुवर्जनइत्यादि प्रतिसरबंधोल्लवत्सर्वं जपित्वा॥
संस्कारार्थं प्रोक्षितप्रतिसरसूत्रेण धर्तव्यो बध्नीयात्॥एतितंत्रपक्षो विशे
षः॥एस्तु एकशांतिप्रतिसरबंधयोः समानतंत्रप्रयोगः॥ ॥ ॥
अथ प्रतिसरबंधः पृथगुच्यते॥नांदीमुखदिने प्रतोषां ते शुचिः स

मदेशं गोमयेन गोचर्ममात्रमुपलिप्य॥तत्र प्राङ्मुख आचार्यो पविश्य
संस्कार्यं दक्षिणतउपविश्य॥देशकालौ स्मृत्वाऽमुककर्मांगभूतं प्रति
सरबंधं करिष्यामीति संकल्प्य॥स्थंडिलं हस्तमात्रं कृत्वोत्तिष्ठान्निरवो
क्ष्य॥तस्मिन्प्रागग्रान् दर्भानास्तीर्य चतुरो ब्राह्मणान्शुचिराचांतः प्रति
दिशमासनेषूपविश्योत्तरतो दर्भेषु प्रोक्षणीः संपूर्य सोदकुंभं पात्रांत
रेण शालितंदुलोपरि निहितप्रतिसरसूत्रं च प्रोक्ष्य स्थंडिले दर्भोपरि कुंभं
निधाय परिस्तीर्य भूर्भुवः सुवरिति शुद्धोदकेनापूर्य गंधयववास्ततैः पुष्पैः
फलैरवकीर्य॥धूपदीपैरभ्यर्च्य॥कुशैर्दूर्वाभिः प्रच्छाद्योत्तरतः शा
लितंदुलोपरि प्रतिसरसूत्रं गंधलिप्तं निधायाचार्याभिमुखाः स्थित्वा ब्रा
ह्मणा यामं कृत्वा स्कुंभमन्वारभ्य साधिव्याहृतीर्जपेयुः॥अग्निमीळेइषे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उ०न०
॥३५॥

त्वोर्जसा॥अग्नआयाहि॥शन्नोदेवीरभिष्टये॥इति शंनोदेवीत्यपेति॥वक्ष्यमाणमंत्रा
श्च जपेयुः॥रुणुष्वपाजः॰॥उत्तस्मान्नासः॥ध्रावाउ॥मदेचिदस्य॥अग्
देवीः॥अग्नेयशस्विन्॰॥जीवाथसर्वे॰॥हिरण्यवर्णाः शुचयः॥ओजो
निधत्त॥यद्दः संप्रतीरहावनुदताहते॥तस्मादान घोनामस्थताबो
नामानिसिंधवः॥पत्नीभिषिताबहूर्ताननारीभ्यस्समवल्गात॥तदाप्नो
दिंद्रो मायतीस्तस्मादापोअनुष्ठन॥अपकामंस्यंदमाना अवीवर
द्वोहिकं॥इंद्रोवःशक्तिभिर्देवीस्तस्माद्वार्णामवोहिता॥एकोदेवो अप्य
तिष्ठत्स्यंदमानायथावशं॥उदानिषुर्महीरिति तस्मादुदकमुच्यते॥
आपोभद्रा॰॥आदित्पश्याम्यि॰॥आपोहिष्ठेतितिस्रः॥हिरण्यवर्णाः शुचयस्योत
रिक्षेयत्तस्यपृथिव्यासंभवक्रंतेव चेसमर्सिक्त्वं वर्चसापत्वा॥
पवमानः सुवर्जनः॥१०॥ ३५
२

जातवेदामोर्जयंत्यापुनातु॥उदुत्तमंवरुणपाशमस्मदवाधमंविमध्यमंश्रथा
य॥अथावयमादित्यव्रतेतवानागसोअदितयेस्याम॥अन्तश्चरसिभूतेषु
भोअंतरिक्षमभिमीतवरिमाणंपृथिव्याः॥आसीदद्धिश्वाभुवनानि सम्रा
डिश्वेत्तानिवरुणस्यव्रतानि॥यत्किंचेदंवरुणदैव्येजनेभिद्रोहंमनुष्याश्चरामसि॥अचित्तीयत्तवधर्मायुयोपिममानस्तस्मादेनसोदेवरीरिषः॥अवतेहेडोव
रुणनमोभिरवयज्ञेभिरीमहेहविर्भिः॥क्षयन्नस्मभ्यमसुरप्रचेतोरा
जन्नेनांसिशिश्रथःकृतानि॥तत्वायामिब्रह्मणावंदमानस्तदाशास्ते
यजमानोहविर्भिः॥अहेडमानोवरुणेहबोध्युरुशंसमानप्रआयुः
प्रमोषीः॥परिणोरुद्रस्यहेतिर्वृणक्तु परित्वेषस्यदुर्मतिरघायोः॥अवस्थि
रामघवद्भ्यस्तनुष्वमीढ्वस्तोकायतनयाय मृडय॥स्तुहिश्रुतंगर्तसद
युवानंमृगंनभीममुपहत्नुमुग्रं॥मृडाजरित्रेरुद्रस्तवानोअन्यंते॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥३५॥ अस्मन्निवपंतु सेनाः॥ मीढुष्टम शीवतमः शिवो नः सुमना भव॥ परमे
वृक्ष आयुधं निधाय कृत्तिं वसान आचर पिनाकं बिभ्रदा गहि॥ अर्ह
न्बिभर्षि सायकानि धन्वार्हन्निष्कं यजतं विश्वरूपं॥ अर्हन्निदं दयसे विश्व
मे भुवनन्न वा ओजीयो रुद्र त्वदस्ति॥ त्वमग्ने रुद्रो असुरो महो दिवस्त्वं श
र्धो मारुतं पृक्ष ईशिषे॥ त्वं वातैररुणैर्यासि शंगयस्त्वं पूषा विधतः पा
सि नु त्मना॥ आ वो राजानमध्वरस्य रु[illegible]द्रं होतारं सत्ययजं रो
दस्योः॥ अग्निं पुरा तनयित्नोरचित्ताद्धिरण्यरूपमवसे कृणुध्वं॥ अग्न
जेलानं प्रथमं पुरस्तात्॥ ब्रह्मसमिन्द्र वसा हुतीनां॥ विष्णोर्नु कं वी
र्याणि प्रवोचं यः पार्थिवानि विममे रजांसि॥ यो अस्कभायदुत्तरं स
धस्थं विचक्रमाणस्त्रेधोरुगायः॥ तदस्य प्रियमभिपाथो अस्यां न

रो यत्र देवयवो मदंति॥ उरुक्रमस्य स हि बंधुरित्था विष्णोः पदे परमे
मध्व उत्सः॥ प्र तद्विष्णुः स्तवते वीर्याय मृगो न भीमः कुचरो गिरिष्ठाः॥ य
स्योरुषु त्रिषु विक्रमणेष्वधिक्षियंति भुवनानि विश्वा॥ परो मात्रया त
नुवा वृधान न ते महित्वमन्वश्नुवंति॥ उभे ते विद्म रजसी पृथिव्या वि
ष्णो देव त्वं परमस्य वित्से॥ विचक्रमे पृथिवीमेष एतां क्षेत्राय विष्णु
र्मनुषे दशस्यन्॥ ध्रुवासो अस्य कीरयो जनास उरुक्षितिं सुजनि
मा चकार॥ त्रिर्देवः पृथिवीमेष एतां विचक्रमे शतर्चसं महित्वा॥
प्र विष्णुरस्तु तवसस्तवीयान् त्वेषं ह्यस्य स्थविरस्य नाम॥ जातवेद
से सुनवाम सोमम[illegible]॥ स नः पर्षदति दुर्गाणि विश्वा
नावेव सिंधुं दुरितात्यग्निः॥ तामग्निवर्णां तपसा ज्वलंतीं वैरोचनीं कर्म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

।।३८।। फलेषु नुष्टां।।दुर्गां देवीं शरणमहं प्रपद्ये सुतरसि तरसे नमः।।अग्ने त्वं पा
रयानव्यो अस्मान्स्वस्तिभिरति दुर्गाणि विश्वा।।पूश्च पृथ्वी बहुला न उ
र्वी भवा तोकाय तनयाय शंयोः।।विश्वानि नो दुर्गहा जातवेदः सिंधुं न नावा
दुरितातिपर्षि।।अग्ने अत्रिवन्मनसा गृणानोस्माकं बोध्यविता तनूनां
पृतनाजितं सहमानमुग्रमग्निं हुवेम परमात्सधस्थात्।।स नः पर्ष
दति दुर्गाणि विश्वा क्षामद्देवो अति दुरितात्यग्निः।।हिरण्यवर्णां हरि
णीं सुवर्णरजतस्रजां।।चंद्रां हिरण्मयीं लक्ष्मीं जातवेदो मम आवह।।तां म
आवह जातवेदो लक्ष्मीमनपगामिनीं।।यस्यां हिरण्यं विंदेयं गामश्वं पु
रुषानहं।।अश्वपूर्वां रथमध्यां हस्तिनादप्रबोधिनीं।।श्रियं देवीमुपह्व
ये श्रीर्मा देवी जुषतां।।कांसोस्मितां हिरण्यप्राकारामार्द्रां ज्वलंतीं तृप्तां

ओं जस्थान।।र्पयंतीं।।पद्मे स्थितां पद्मवर्णां तामिहोपह्वये श्रियं।।चंद्रां प्रभासां
यशसा ज्वलंतीं श्रियं लोके देवजुष्टामुदारां।।तां पद्मिनीमीं शरणमहं प्रपद्ये अ
लक्ष्मीर्मे नश्यतां त्वां वृणे।।आदित्यवर्णे तपसोधिजातो वनस्पतिस्तव वृक्षो
थ बिल्वः।।तस्य फलानि तपसा नुदंतु मायांतरायाश्च बाह्या अलक्ष्मीः।।
उपैतु मां देवसखः कीर्तिश्च मणिना सह।।प्रादुर्भूतोस्मि राष्ट्रेस्मिन् कीर्तिमृद्धिं
ददातु मे।।क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहं।।अभूतिमसमृद्धिं
च सर्वां निर्णुद मे गृहात्।।गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीं।।ईश्व
रीं सर्वभूतानां तामिहोपह्वये श्रियं।।मनसः काममाकूतिं वाचः सत्यम
शीमहि पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः।।कर्दमेन प्रजा भूता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२८

मपिसंभ्रंमकर्दम॥श्रियंवासयमेकुलेमातरंपद्ममालनी॥आपस्रजंतु
स्निग्धानिचिक्लीतवसमेगृहे॥निचदेवीमातरंश्रियंवासयमेकुले॥आर्द्रां
पुष्करीणींपुष्टिंपिंगलांपद्ममालिनीं॥चंद्रांहिरण्मयींलक्ष्मींजातवेदोमआ
वह॥आर्द्रांयःकरीणींयष्टींसुवर्णांहेममालिनीं॥सूर्यांहिरण्मयींलक्ष्मीं
जातवेदोमआवह॥तांमआवहजातवेदोलक्ष्मीमनपगामिनीं॥यस्यांहि
रण्यंप्रभूतंगावोदास्योश्वान्विंदेयंपुरुषानहं॥यःशुचिःप्रयतोभूत्वाजु
हुयादाज्यमन्वहं॥सूक्तंपंचदशर्चंचश्रीकामःसततंजपेत्॥नमोब्रह्म
णे॥०॥इहलेकरोमिपुनर्द्धिः॥ओ३मिलिकुंभमुखाप्यभूर्भुवःस्वः॥
दधिक्राव्णोअकारिषं॥०॥चरुः॥उत्तिष्ठेतिसर्पिःसंस्कार्यंप्रोक्ष्य॥

३८

प्रतिसरसूत्रमाचार्योस्य पवासुकीध्यात्वा॥त्र्यंबकंयजामहेसुगंधिंपुष्टिव
र्धनं॥उर्वारुकमिवबंधनान्मृत्योर्मुक्षीयमामृतात्॥इतित्रिभिस्सनाप्रतिस
रसूत्रंसंस्पृश्य॥यजमानस्यदक्षिणकरंगृहीत्वा॥अग्निरायुष्मांनितिपं
चमंत्रान्जपेत्॥बृहत्सामक्षत्रभृद्वृद्धवृष्ण्यंत्रिष्टुभौजःशुभितमुग्र
वीरं॥इंद्रस्तोमेनपंचदशेनमध्यमिदंवातेनसगरेणरक्षा॥इतिमंत्रेण
बध्नीयात्॥स्त्रीणांवामकरे॥योब्रह्माब्रह्मणउज्जभारप्राणैश्वरःकृ
त्तिवासाःपिनाकी॥ईशानोदेवःसनआयुर्दधातुतस्मैजुहोमिहविषाघृ
तेन॥विभ्राजमानःसरिरस्यमध्याद्रोचमानोघर्मरुचिर्यआगात्॥
समृत्युपाशानपनुद्यघोरानिहायुषेणोघृतमत्तुदेवः॥ब्रह्मज्योतिर्ब्रह्मप
त्नीषुगर्भंयमादधात्पुरुरूपंजयंतं॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३९

सुवर्णरं भंगरूमकेमर्च्यंतमायुषेच धर्षयामोघ्नतेना ॥ श्रियंलक्ष्मी बोपलामं
बिकां गांषष्ठीं चपामिंद्रसेनेत्युदाहुः ॥ नाबिभ्यं ब्रह्मयोनिं सरूपामिहायुषे
तर्पयामोघ्नतेन ॥ दाक्षायण्यः सर्वयोन्यः सयोन्यः सहस्रशोविश्वरूपावि
रूपाः ॥ ससूनवः सपत्नयः सयूथ्या आयुषेनोघ्नतमिदंजुषंतां ॥ दिव्यागणा
बहुरूपाः पुराणा आयुश्छिदेनः प्रमथंतु वीरान् ॥ तेभ्योजुहोमिबहुधाघृतेन
मानः प्रजां रीरिषमातरो वीरान् ॥ एकः पुरस्ताद्य इदं बभूव यतोबभूवभु
वनस्यगोपाः ॥ यमप्येति भुवनं सांपराये सनोहविर्घृतमिहायुषेत्तु देवः ॥
वसून्रुद्रानादित्यान्मरुतोथ साध्यानृभून्यक्षान्गंधर्वांश्चपितॄंश्चविश्वा
न् ॥ भृगून्सर्पांश्चांगिरसोथसर्वान्घृतं हुत्वास्वायुष्यामहयामिशश्वत् ॥
रक्षस्थभिर्मंत्रैः संस्कार्यं रक्षां कुर्यात् ॥ ततो यजमान ऋत्विग्भ्यामाचार्याय द

३९

क्षिणां दद्यात् ॥ इती श्री दीप मन्वाधीय पुत्रोक्तः प्रतिसरबंधः समाप्तः ॥
इतिसप्रतिसरबंधोदकशांतिः समाप्ता ॥ शाके ॥ इंदुनंदाद्रिकुयुते शाके
शुक्ले च वत्सरे ॥ वैशाखे कृष्णद्वादश्यां संगतां प्राप पुस्तकं ॥१॥ ॥ ॥ ॥ ॥
पिंपर्खेडोपनामाख्येन सीतारामेण चात्मना ॥ लिखितेयमुदकशांतिः स्वपरा
र्थं न संशयः ॥२॥ श्री तुलजादेव्यर्पणमस्तु ॥ सीतारामो जयति ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ उदयकृ:रातिःसमाप्ताजुआदेशि ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=20.08.19 15:00
,TRANSFERRED=2019/08/20 at 15:12:04
,PAGES=42
,TYPE=STD
,NAME=S0001513
,Book Name=M-749-UDAKSHANTI
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection